Śrī Paramātma Sandarbha

Appendix

Sanskrit Text

तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ॥ १ ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥ २ ॥

१ । अथ परमात्मा विव्रियते । यद्यपि परमात्मत्वं वैकुण्ठेऽपि प्रभोरस्ति तदपि च भगवत्ताङ्गं तत् स्यादित्थं जगद्गतं वाच्यम् । तत्र तं जगद्गतजीवनिरूपणपूर्वकं निरूपयति द्वाभ्याम् (भा० ५।११।१२–१३) —

क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ ३ ॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात् स्वयञ्ज्योतिरजः परेशः ।
नारायणो भगवान् वासुदेवः स्वमाययात्मन्यवधीयमानः ॥ ४ ॥

यः शुद्धोऽपि मायातः परोऽपि मायारचितस्य वक्ष्यमाणस्य सर्वक्षेत्रज्ञस्य मायया कल्पितस्य मनसोऽन्तःकरणस्यैताः प्रसिद्धा विभूतीर्वृत्तीर्विचष्टे विशेषेण पश्यंस्तत्राविष्टो भवति स खल्वसौ जीवनामा स्वशरीरद्वयलक्षणक्षेत्रस्य ज्ञातृत्वात् क्षेत्रज्ञ उच्यत इत्यर्थः । तदुक्तम् (भा० १।७।५) —

यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् ।
परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ ५ ॥ इति ।

तस्य मनसः । कीदृशतया मायारचितस्य ? तत्राह — जीवस्य जीवोपाधितया जीवतादात्म्येन रचितस्य । ततश्च तत् तयोपचर्यमाणस्येत्यर्थः ।

ततश्च कीदृशस्य ? अविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तादृशस्य । कीदृशीर्विभूतीः ? नित्या अनादित एवानुगताः । तत्र च कदा कीदृशीः ? इत्यपेक्षायामाह — जाग्रत्स्वप्नयोराविर्भूताः सुषुप्तौ तिरोहिताश्चेति ।

यस्तु पुराणो जगत्कारणभूतः पुरुषः "आद्योऽवतारः पुरुषः परस्य" (भा० २।६।४१) इत्यादिना द्वितीयादौ प्रसिद्धः । साक्षादेव स्वयञ्ज्योतिः स्वप्रकाशः । न तु जीववदन्यापेक्षया । अजो जन्मादिशून्यः । परेषां ब्रह्मादीनां अपीशः । नारं जीवसमूहः स्वनियम्यत्वेनायनं यस्य सः । भगवानैश्वर्याद्यंशवान् भगवदंशत्वात् । वासुदेवः सर्वभूतानामाश्रयः । स्वमायया स्वस्वरूपशक्त्या आत्मनि स्वस्वरूपे अवधीयमानोऽवस्थाप्यमानः । कर्मकर्तृप्रयोगः । मायायां मायिकेऽप्यन्तर्यामित्वेन प्रविष्टोऽपि स्वरूपशक्त्या स्वरूपस्थ एव न तु तत्संसक्त इत्यर्थः ।

वासुदेवत्वेन सर्वक्षेत्रज्ञातृत्वात् सोऽपरो मायामोहिताज् जीवादन्यो मायारहितः शुद्धः क्षेत्रज्ञ आत्मा परमात्मेति । तदेवमपि मुख्यं क्षेत्रज्ञत्वं परमात्मन्येव ।

तदुक्तम् "सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे" (भा० ६।४।२५) इति । श्रीगीतोपनिषत्सु (गीता १३।१-२) —

> इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
> एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥ ६ ॥
> क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
> क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तज् ज्ञानं मतं मम ॥ ७ ॥ इति ।

अत्र खलु "क्षेत्रज्ञं चापि मां विद्धि" इति सर्वेष्वपि क्षेत्रेषु मां च क्षेत्रज्ञं विद्धि न तु जीवमिव स्वस्वक्षेत्र एवेत्येवार्थ इति ।

न च जीवेशयोः सामानाधिकरण्येन निर्विशेषचिद्वस्त्वेव ज्ञेयतया निर्दिशति "सर्वक्षेत्रेषु" इत्यस्य वैयर्थ्यापत्तेः । "ज्ञेयं यत्तत् प्रवक्ष्यामि" (गीता १३।१२) इत्यादिना । "सर्वतः पाणिपादं तद् सर्वतोऽक्षिशिरोमुखम्" (गीता १३।१३) इत्यादिना च सविशेषस्यैव निर्देक्ष्यमाणत्वात् । "अमानित्वम्" (गीता १३।७) इत्यादिना ज्ञानस्य च तथोपदेक्ष्यमाणत्वात् ।

किं च "क्षेत्रज्ञं चापि" इत्यत्र "तत्त्वमसि" (छा० ६।८।७) इतिवत् सामानाधिकरण्येन तन्निर्विशेषज्ञाने विवक्षिते "क्षेत्रज्ञेश्वरयोर्ज्ञानम्" इत्येवानूद्येत न तु "क्षेत्रक्षेत्रज्ञयोर्ज्ञानम्" इति । किन्तु क्षेत्रक्षेत्रज्ञयोरित्यस्यायमर्थः — द्विविधयोरपि क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं तन् ममैव ज्ञानं मतम् । "अन्यार्थश्च परामर्शः" (ब्र० सू० १।३।२०) इति न्यायेन मज्ज्ञानैकतात्पर्यकमित्यर्थः — ज्ञेयस्यैकत्वेनैव निर्दिष्टत्वाद् योग्यत्वाच्च ।

न च निरीश्वरसाङ्ख्यवत् क्षेत्रक्षेत्रज्ञमात्रविभागादत्र ज्ञानं मतम् । "माम्" इत्यनेनेश्वरस्यापेक्षितत्वात् ।

न च विवर्तवादवदीश्वरस्यापि भ्रममात्रप्रतीतपुरुषत्वं तद्वचनलक्षणसवेदगीतादिशास्त्रा-णामप्रामाण्यात् बौद्धवादापत्तेः । तस्यां च सत्यां बौद्धानामिव विवर्तवादिनां तद्व्याख्या-नायुक्तेः ।

न च तस्य सत्यपुरुषत्वेऽपि निर्विशेषज्ञानमेव मोक्षसाधनमिति तदीयशास्त्रान्तरतः समाहार्यम् । "एवं सततयुक्ता ये" (गीता १२।१) इत्यादिपूर्वाध्याये निर्विशेषज्ञानस्य हेयत्वेन विवक्षिततत्वात् । तत्रैव च "ये तु सर्वाणि कर्माणि" (गीता १२।६) इत्यादि-नानन्यभक्तानुद्दिश्य "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" (गीता १२।७) इत्यनेन तज्ज्ञानापेक्षापि नादृतेति ।

तदुक्तमेकादशे स्वयं भगवता "यत्कर्मभिर्यत्तपसा" (भा० ११।२०।३२) इत्यादि ।

मोक्षधर्मे च —

> या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये ।
> तया विना तदाप्नोति नरो नारायणाश्रयः ॥ ८ ॥ इति ।

अत्र तु पूर्वाध्यायविश्लाघितं तदेवावृथाकर्तुं सविशेषतया निर्दिश्य (गीता १३।१८) —

> इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
> मद्भक्त एतद् विज्ञाय मद्भावायोपपद्यते ॥ ९ ॥

इत्यन्तेन भक्तिसंवलिततया सुकरार्थप्रायं कृतम् ।

अत एवात्र व्यष्टिक्षेत्रज्ञ एव भक्तत्वेन निर्दिष्टः समष्टिक्षेत्रज्ञस्तु ज्ञेयत्वेनेति क्षेत्रक्षेत्रज्ञज्ञा-नाभ्यां सह ज्ञेयस्य पाठादनुस्मार्य तदनन्तरं च तस्य तस्य च जीवत्वमीश्वरत्वं च क्षरं नेति दर्शितम् । यतः (गीता १३।२१) —

> पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
> कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ १० ॥

इति जीवस्य प्रकृतिस्थत्वं निर्दिश्य स्वतस्तस्याप्राकृतत्वदर्शनया स्फुटमेवाक्षरत्वं ज्ञापि-तम् (गीता १३।२२) —

> उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
> परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ ११ ॥

इति जीवात् परत्वेन निर्दिष्टस्य परमात्माख्यपुरुषस्य तु कैमुत्येनैव तद्दर्शितम् ।

गीता १५।१६-१७) —

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १२ ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १३ ॥

इत्यत्र जीवस्याप्यक्षरत्वं कण्ठोक्तमेव ।

तत्रोपद्रष्टा परमसाक्षी । अनुमन्ता तत्तत्कर्मानुरूपः प्रवर्तकः । भर्ता पोषकः । भोक्ता पालयिता । महेश्वरः सर्वाधिकर्ता । परमात्मा सर्वान्तर्यामीति व्याख्येयम् ।

उत्तरपद्ययोस्तु कूटस्थ "एकरूपतया तु यः कालव्यापी स कूटस्थः" इत्यमरकोषादवगतार्थः । असौ शुद्धजीव एव "उत्तमः पुरुषस्त्वन्यः" इत्युत्तरात् । तदेवमत्रापि क्षेत्रक्षेत्रज्ञसर्वक्षेत्रज्ञा उक्ताः । अत्र चोत्तरयोरन्य इत्यनेन भिन्नयोरेव सतोरक्षरयोर्न तत्तद्रूपतापरित्यागः सम्भवेदिति न कदाचिदपि निर्विशेषरूपेणावस्थितिरिति दर्शितम् ।

तस्मात् "मद्भावायोपपद्यते" (गीता १३।१८) इति यदुक्तं तदपि तत्सार्ष्टिप्राप्तितात्पर्यकम् । तदेवं द्वयोरक्षरत्वेन साम्येऽपि जीवस्य हीनशक्तित्वात् प्रकृत्याविष्टस्य तन्निवृत्त्यर्थमीश्वर एव भजनीयत्वेन ज्ञेय इति भावः ।

तस्मात् "इदं शरीरम्" (गीता १३।१) इत्यादिकं पुनरित्थं विवेचनीयम् । इदमिति स्वस्वापरोक्षमित्यर्थः । शरीरक्षेत्रयोरेकैकत्वेन ग्रहणमत्र व्यक्तिपर्यवसानेन जातिपुरस्कारेणैवेति गम्यते । "सर्वक्षेत्रेषु" (गीता १३।२) इति बहुवचनेनानुवादात् ।

"एतद् यो वेत्ति" (गीता १३।१) इत्यत्र । "देहोऽसवोऽक्षा मनवः" (भा० ६।४।२५) इत्यादौ "सर्वं पुमान् वेदगुणांश्च तज्ज्ञः" इत्युक्तदिशा । "क्षेत्रज्ञ एता मनसो विभूतीः" (भा० ५।११।१२) इत्युक्तदिशा च जानातीत्यर्थः ।

"क्षेत्रज्ञं चापि मां विद्धि" इत्यत्र मां स्वयं भगवन्तमेव सर्वेष्वपि समष्टिव्यष्टिरूपेषु क्षेत्रेषु न तु पूर्वक्षेत्रज्ञवत् निजनिजक्षेत्र एव क्षेत्रज्ञं च विद्धीति । "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" (गीता १०।४२) इति ।

यत्र गत्यन्तरं नास्ति तत्रैव लक्षणामयकष्टमाश्रीयते । तथापि तेन सामानाधिकरण्यं यदि विवक्षितं स्यात् तर्हि "क्षेत्रज्ञं चापि मां विद्धि" इत्येतावदेव तं च मां विद्धीत्येतावदेव वा प्रोच्येत न तु सर्वक्षेत्रेषु भारतेत्यधिकमपि । किन्तु "क्षेत्रज्ञ एता मनसो विभूतीः" (भा० ५।११।१२) इत्यादिवत् क्षेत्रज्ञद्वयमपि वक्तव्यमेव स्यात् । तथा च ब्रह्मसूत्रम् "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" (ब्र० सू० १।२।११) इति ।

तद्द्वैध्यमेव चोपसंहृतम् "पुरुषः प्रकृतिस्थो हि" (गीता १३।२१) इत्यादिना । तस्मादुपक्रमार्थस्योपसंहाराधीनत्वादेष एवार्थः समञ्जसः । यथोक्तं ब्रह्मसूत्रकृद्भिः "असद् व्यपदेशान् नेति चेन् न धर्मान्तरेण वाक्यशेषात्" (ब्र० सू० २।१।१७) इति ।

अथ "क्षेत्रक्षेत्रज्ञयोर्ज्ञानम्" (गीता १३।२) इत्यत्र यत् क्षेत्रे ज्ञानेन्द्रियगतं तेनागतं च ज्ञानं दर्शयिष्यते । यच्च पूर्वक्षेत्रज्ञे निजनिजक्षेत्रज्ञानं दर्शितं तत्तन्मज्ज्ञानांशस्य क्षेत्रेषु च्छायारूपत्वात् क्षेत्रज्ञेषु यत् किञ्चिदंशांशतया प्रवेशान् ममैव ज्ञानं मतमिति । तस्मात् साधूक्तं मुख्यं क्षेत्रज्ञत्वं परमात्मन्येवेति ।

अत्र श्रीभगवतः परमात्मरूपेणाविर्भावोऽपि “अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्” (भा० १०।८७।३०) इत्युक्तदिशा शक्तिविशेषालिङ्गित्वाद् यस्मादेवांशाज् जीवानामाविर्भावस्तेनैवेति ज्ञेयम् । तदुक्तं तत्रैव “विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्” (गीता १०।४२) इत्यादि । श्रीविष्णुपुराणे च (वि० पु० १।९।५२) —

यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता ।
परब्रह्मस्वरूपस्य प्रणमाम तमव्ययम् ॥ १४ ॥ इति ।

पूर्णशुद्धशक्तिस्तु “कलाकाष्ठानिमेषादि” (वि० पु० १।९।४४) इत्यनेन दर्शिता । तथा श्रीनारदपञ्चरात्रे श्रीनारद उवाच —

शुद्धसर्गमहं देव ज्ञातुमिच्छामि तत्त्वतः ।
सर्गद्वयस्य चैवास्य यः परत्वेन वर्तते ॥ १५ ॥

तत्रैतत्पूर्वोक्तः प्राधानिकः शाक्तश्चेत्येतत् सर्गद्वयस्येति ज्ञेयम् ।

श्रीभगवानुवाच
यः सर्वव्यापको देवः परब्रह्म च शाश्वतम् ।
चित्सामान्यं जगत्यस्मिन् परमानन्दलक्षणम् ॥ १६ ॥
वासुदेवादभिन्नस् तु वह्न्यर्केन्दुशतप्रभम् ।
वासुदेवोऽपि भगवांस्तद्धर्मा परमेश्वरः ॥ १७ ॥
स्वां दीप्तिं क्षोभयत्येव तेजसा तेन वै युतम् ।
प्रकाशरूपो भगवानच्युतं चासृजद् द्विज ॥ १८ ॥
सोऽच्युतोऽच्युततेजाश्च स्वरूपं वितनोति वै ।
आश्रित्य वासुदेवं च स्वस्थो मेघो जलं यथा ॥ १९ ॥
क्षोभयित्वा स्वमात्मानं सत्यभास्वरविग्रहम् ।
उत्पादयामास तदा समुद्रोर्मिजलं यथा ॥ २० ॥
स चिन्मयः प्रकाशात्मा उत्पाद्यात्मानमात्मना ।
पुरुषाख्यमनन्तं च प्रकाशप्रसरं महत् ॥ २१ ॥
स च वै सर्वजीवानामाश्रयः परमेश्वरः ।
अन्तर्यामी च तेषां वै तारकाणामिवाम्बरम् ॥ २२ ॥
सेन्धनः पावको यद्वत् स्फुलिङ्गनिचयं द्विज ।
अनिच्छातः प्रेरयति तद्वदेष परः प्रभुः ॥ २३ ॥
प्राग्वासनानिबन्धानां बन्धानां च विमुक्तये ।
तस्माद् विद्धि तदंशांस्तान् सर्वांशं तमजं प्रभुम् ॥ २४ ॥ इति ।

अत एव यत् तु ब्रह्मादौ श्रीप्रद्युम्नस्य । मन्वादौ श्रीविष्णोः । रुद्रादौ श्रीसङ्कर्षणस्यान्तर्यामित्वं श्रूयते तन्नानांशमादायावतीर्णस्य तस्यैव तत्तदंशेन तत्तदन्तर्यामित्वमिति मन्तव्यम् । अत एव रुद्रस्य श्रीसङ्कर्षणप्रकृतित्वं पुरुषप्रकृतित्वं चेत्युभयमप्याम्नातम् "प्रकृतिमात्मनः सङ्कर्षणसञ्ज्ञां भव उपधावति" (भा० ५।१७।१६) इत्यादौ । "आदावभूच्छतधृतिः" (भा० ११।४।५) इत्यादौ च । एष एव (वि० पु० ५।१८।५०) —

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥ २५ ॥

इत्यादौ विवृतः । तस्मात् सर्वान्तर्यामी पुरुष एव "ब्रह्मेति परमात्मेति" (भा० १।२।११) इत्यादौ परमात्मत्वेन निर्दिष्ट इति स्थितम् ।
व्याख्यातं च स्वामिभिः "नमस तुभ्यं भगवते ब्रह्मणे परमात्मने" (भा० १०।२८।६) इत्यत्र वरुणस्तुतौ "परमात्मने सर्वजीवनियन्त्रे" इति ।
अस्य परमात्मनो मायोपाधितया पुरुषत्वं तूपचरितमेव । तदुक्तं वैष्णवे एव (वि० पु० ६।८।६०–६१) —

नान्तोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति
वृद्धिर्न यस्य परिणामविवर्जितस्य ।
नापक्षयं च समुपैत्य विकल्पवस्तु
यस्तं नतोऽस्मि पुरुषोत्तममाद्यमीड्यम् ॥ २६ ॥
तस्यैव योऽनु गुणभुग् बहुधैक एव
शुद्धोऽप्यशुद्ध इव मूर्तिविभागभेदैः ।
ज्ञानान्वितः सकलसत्त्वविभूतिकर्ता
तस्मै नतोऽस्मि पुरुषाय सदाव्ययाय ॥ २७ ॥ इति ।

अत्र "तस्यैव अनु पूर्वोक्तात् परमेश्वरात् समनन्तरं बहुधा ब्रह्मादिरूपेण । अशुद्ध इव सृष्ट्यादिष्वासक्त इव । मूर्तिविभागानां दक्षादिमन्वादिरूपाणां भेदैः । सर्वसत्त्वानां विभूतिकर्ता विस्तारकृत्" इति स्वामिपादाः ।
तत्र गुणभुगिति षाड्गुण्यानन्दभोक्तेत्यर्थः ।
म० भा० १२।३३४।२९–३० —

यत् तत् सूक्ष्ममविज्ञानमव्यक्तमचलं ध्रुवम् ।
इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतैश्च वर्जितम् ॥ २८ ॥
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते ।
त्रिगुणव्यतिरिक्तो वै पुरुषश्चेति कल्पितः ॥ २९ ॥

इति मोक्षधर्मेऽपि नारायणीयोपाख्याने ।
श्रुतयोऽप्येनं शुद्धत्वेनैव वर्णयन्ति (श्वे० ६।११, ४।५) —

एको देवो सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥ ३० ॥
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ ३१ ॥

इत्याद्याः । तस्मात् साधु व्याख्यातम् "क्षेत्रज्ञ एताः" इत्यादिपद्यद्वयम् ॥ श्रीब्राह्मणो रहूगणम् ॥

२ । अथ तस्याविर्भावे योग्यता प्राग्वद् भक्तिरेव ज्ञेया । आविर्भावस्तु त्रिधा । यथा नारदीयतन्त्रे —

विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ।
प्रथमं महतः स्रष्टृ द्वितीयं तन्तुसंस्थितम् ।
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥ ३२ ॥ इति ।

तत्र प्रथमः "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" (बृ० २।१।२०) "स ऐक्षत" (बृ० १।२।५) इत्याद्युक्तो महासमष्टिजीवप्रकृत्योरेकतापन्नयोर्द्रष्टेत्येक एव । अयमेव सङ्कर्षण इति महाविष्णुरिति च । ब्रह्मसंहितायां यथा "तल्लिङ्गं भगवान् शम्भुर्ज्योतीरूपं सनातनम्" (ब्र० सं० ५।८) "तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः" (ब्र० सं० ५।१०) "सहस्रशीर्षा पुरुषः" (ब्र० सं० ५।११) इत्यारभ्य । ब्र० सं० ५।१२–१३ —

नारायणः स भगवानापस्तस्मात् सनातनात् ।
आविरासीत् कारणार्णो निधिः सङ्कर्षणात्मकः ।
योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ॥ ३३ ॥
तद्रोमबिलजालेषु बीजं सङ्कर्षणस्य च ।
हैमान्यण्डानि जातानि महाभूतावृतानि तु ॥ ३४ ॥ इत्यादि ।

लिङ्गमिति "यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" (वि० पु० १।९।५३) इत्यनुसारेण तस्य महाभगवतः श्रीगोविन्दपुरुषोत्पादकत्वाल्लिङ्गमिव लिङ्गं यः खल्वंशविशेषस्तदेव शम्भुः । शम्भुशब्दस्य मुख्याया वृत्तेराश्रय इत्यर्थः । लिङ्गं भगवत एवाङ्गविशेष इति तत्प्रकरणलब्धम् ।
अथ द्वितीयपुरुषः "तत् सृष्ट्वा तदेवानुप्रविशत्" (तै० २।६।२) इत्याद्युक्तः समष्टिजीवान्तर्यामी । तेषां ब्रह्माण्डात्मकानां बहुभेदाद् बहुभेदः । तत्रैव सूक्ष्मान्तर्यामी प्रद्युम्नः स्थूलान्तर्याम्यनिरुद्ध इति क्वचित् । अनेन महावैकुण्ठस्थाः सङ्कर्षणादयस्तदंशिनः । ये तु चित्ताद्यधिष्ठातारो वासुदेवादयस्ते तदंशा एवेत्यादि विवेचनीयम् ।
तृतीयोऽपि पुरुषः (मु० ३।१।१, श्वे० ४।६) —

> द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
> एकस्तयोर्खादति पिप्पलान्नमन्यो निरश्नन्नभिचाकशीति ॥ ३५ ॥

इत्याद्युक्तो व्यष्ट्यन्तर्यामी ।
तेषाम् बहुभेदाद् बहुभेदः ।
तत्र प्रथमस्याविर्भावो यथा “आद्योऽवतारः पुरुषः परस्य” (भा० २।६।४१) इति ।
टीका च — परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः । यस्य “सहस्रशीर्षा” इत्याद्युक्तो लीलाविग्रहः स आद्योऽवतारः (ऋग्वेद १०।९०।१) इत्येषा ।
अत्र चान्यत्र चावतारत्वं नामैकपादविभूत्याविर्भावत्वं ज्ञेयम् ॥ श्रीब्रह्मा श्रीनारदम् ॥

३ । द्वितीयस्य यथा (भा० ३।८।२३) —

> कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः ।
> स्वयं तदन्तर्हृदयेऽवभातमपश्यतापश्यत यन् न पूर्वम् ॥ ३६ ॥
> मृणालगौरायतशेषभोगपर्यङ्क एकं पुरुषं शयानम् ॥ ३७ ॥ इत्यादि ।

अयं गर्भोदकस्थः सहस्रशीर्षा प्रद्युम्न एव । पुरुषायुषा वत्सरशतेन योगो भक्तियोगः । एतदग्रेऽपि “अव्यक्तमूलम्” (भा० ३।८।२९) इत्यत्र अव्यक्तं प्रधानं मूलमधोभागो यस्येत्यर्थः । “भुवनाङ्घ्रिपेन्द्रम्” (भा० ३।८।२९) इति । भुवनानि चतुर्दश तद्रूपा अङ्घ्रिपास्तेषामिन्द्रं तन्नियन्तृत्वेन वर्तमानमित्यर्थः ॥ श्रीमैत्रेयो विदुरम् ॥

४ । तृतीयस्याविर्भावो यथा (भा० २।२।८) —

> केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
> चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ३८ ॥ इत्यादि ।

प्रादेशस्तर्जन्यङ्गुष्ठयोर्विस्तारस्तत्प्रमाणम् “हृद्यपेक्षया मनुष्याधिकारत्वात्” (ब्र० सू० १।३।२५) इति न्यायेन ॥ श्रीशुकः ॥

५ । एवं पुरुषस्यानेकविधत्वेऽपि दृष्टान्तेनैक्यमुपपादयति (भा० ५।११।१४) —

> यथानिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ।
> एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ ३९ ॥

आत्मस्वरूपेण प्राणरूपेण निविष्ट ईशेदीशेत नियमयति । इदं विश्वम् । श्रुतिश्च (कठ २।२।१०) —

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ४० ॥
इति काठके ॥ श्रीब्राह्मणो रहूगणम् ॥

६ । तथा (भा० १०।५४।४४) —

एक एव परो ह्यात्मा सर्वेषामेव देहिनाम् ।
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४१ ॥

देहिनां जीवानाम् । आत्मा परमात्मा ॥ श्रीबलदेवः श्रीरुक्मिणीम् ॥

७ । एवम् (भा० ११।१८।३२) —

एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ।
यथेन्दुरुदपात्रेषु भूतान्येकात्मकानि च ॥ ४२ ॥

भूतेषु जीवेषु एक एव पर आत्मा न त्वसौ जीववत् तत्र तत्र लिप्तो भवति इत्याह — आत्मनि स्वस्वरूप एव अवस्थितः । भूतानि जीवदेहा अपि येन कारणरूपेणैकात्मकानीति ॥ श्रीभगवानुद्धवम् ॥

८ । एवमेकस्य पुरुषस्य नानात्वमुपपाद्य तस्य पुनरंशा विव्रियन्ते । अत्र द्विविधा अंशाः — स्वांशा विभिन्नांशाश्च । विभिन्नांशास्तटस्थशक्त्यात्मका जीवा इति वक्ष्यते । स्वांशास्तु गुणलीलाद्यवतारभेदेन विविधाः । तत्र लीलाद्यवताराः प्रसङ्गसङ्गत्या श्रीकृष्णसन्दर्भे वक्ष्यन्ते ।
गुणावतारा यथा (भा० ११।४।५) —

आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः ।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥ ४३ ॥

स युगपत् गुणत्रयाधिष्ठाताद्यः पुरुषः पृथक् पृथगपि तत्तद्गुणाधिष्ठानलीलयैव आदौ रजसा अस्य जगतः सर्गे विसर्गे कार्ये शतधृतिर्ब्रह्मा अभूत् ।
स्थितौ विष्णुः सत्त्वेनेति शेषः । तत्र साक्षाद् गुणानुक्तिश्च तस्यातिरोहितस्वरूपतया तत्सम्बन्धोपचारस्याप्युट्टङ्कनमयुक्तमित्यभिप्रायेण ।
पालनकर्तृत्वेन क्रतुपतिस्तत्फलदाता । यज्ञरूपस्तु लीलावतारमध्य एव श्रीब्रह्मणा द्वितीये गणितः । द्विजानां धर्मानां च सेतुः पालक इत्यर्थः ।
तमसा तस्याप्ययाय रुद्रोऽभूदित्यनेन प्रकारेण उद्भवस्थितिलया भवन्तीति । अत्र ब्रह्मरुद्रयोरवतारावसरो मोक्षधर्मे विविक्तोऽस्ति । यथा (म० भा० १२।३४१।१६-१८) —

ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः ।
प्रसादात् प्रादुरभवत् पद्मं पद्मनिभेक्षण ॥ ४४ ॥
तत्र ब्रह्मा समभवत् स तस्यैव प्रसादजः ।
अह्नः क्षये ललाटाच्च सुतो देवस्य वै तथा ॥ ४५ ॥
क्रोधाविष्टस्य सञ्जज्ञे रुद्रः संहारकारकः ॥ ४६ ॥ इति ।

श्रीविष्णोस्तु तृतीये दृश्यते (भा० ३।८।१५) —

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत् सर्वगुणावभासम् ।
तस्मिन् स्वयं वेदमयो विधाता स्वयम्भुवं यं स्म वदन्ति सोऽभूत् ॥ ४७ ॥ इति ।

अस्यार्थः — तल्लोकात्मकं पद्मम् । सर्वगुणान् जीवभोग्यानर्थानवभासयतीति तथा । तद्यस्माज् जातं श्रीनारायणाख्यः पुरुष एव विष्णुसञ्ज्ञः सन् स्थापनरूपान्तर्यामितायै प्रावीविशत् प्रकर्षेनालुप्तशक्तितयैवाविशत् । स्वार्थे णिच् । तस्मिन् श्रीविष्णुना लब्ध-स्थितौ पद्मे पुनः सृष्ट्यर्थं स्वयमेव ब्रह्माभूत् स्थितस्यैव मृदादेर्घटादितया सृष्टेः । अत एव "स्थित्यादये हरिविरिञ्चिहरेति सञ्ज्ञाः" (भा० १।२।२३) इत्यन्यत्रापि ॥ श्रीद्रुमिलो निमिम् ॥

९ । एवम् "यो वा अहं च गिरिशं च विभुः स्वयं च" (भा० ३।९।१६) इत्यादौ ।
"त्रिपात्" इति । टीका च "यो वै एकस्त्रिपात् त्रयो ब्रह्मादयः पादाः स्कन्धा यस्य" इत्येषा ।
वृक्षरूपत्वेन तद्वर्णनादेषां स्कन्धत्वम् ॥ ब्रह्मा श्रीगर्भोदशायिनम् ॥

१० । तेषामाविर्भावो यथा (भा० ४।१।२१-२२) —

तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना ।
निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ ४८ ॥
अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः ।
वितायमानयशसस्तदाश्रमपदं ययुः ॥ ४९ ॥ इत्यादि ।

मुनेरत्रेः ॥ श्रीमैत्रेयो विदुरम् ॥

११ । यथा वा (भा० १०।८९।१) —

सरस्वत्यास्तटे राजनृषयः सत्रमासते ।
वितर्कः समभूत् तेषां त्रिष्वधीशेषु को महान् ॥ ५० ॥ इत्यादिरितिहासः ।

अत्र श्रीविष्णोः स्थानं च क्षीरोदादिकं पाद्मोत्तरखण्डादौ जगत्पालननिमित्तकनिवेदना-र्थं ब्रह्मादयस्तत्र मुहुर्गच्छतीति प्रसिद्धेः । विष्णुलोकतया प्रसिद्धेश्च । बृहत्सहस्रनाम्नि च

क्षीराब्धिमन्दिर इति तन्नामगणे पठ्यते । श्वेतद्वीपपतेः क्वचिदनिरुद्धतया ख्यातिश्च तस्य साक्षादेवाविर्भाव इत्यपेक्षयेति ।
एवं परीक्षया तत्र त्रिदेव्यास्तारतम्यमपि स्फुटम् ॥ श्रीशुकः ॥

१२ । तथा चान्यत्र द्वयेनाह (भा० १।२।२३) —

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्
युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति सञ्ज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ ५१ ॥

इह यद्यप्येक एव परः पुमानस्य विश्वस्य स्थित्यादये सृष्टिस्थितिलयार्थं तैः सत्त्वादिभिर्युक्तः पृथक् तत्तदधिष्ठाता तथापि परस्तदसंश्लिष्टः सन् हरिविरिञ्चहरेति सञ्ज्ञा भिन्ना धत्ते तत्तद्रूपेणाविर्भवतीत्यर्थः । तथापि तत्र तेषां मध्ये श्रेयांसि धर्मार्थकाममोक्षभक्त्याख्यानि शुभफलानि सत्त्वतनोरधिष्ठितसत्त्वशक्तेः श्रीविष्णोरेव स्युः ।
अयं भावः — उपाधिदृष्ट्या तौ द्वौ सेवमाने रजस्तमसोर्घोरमूढत्वात् भवन्तोऽपि धर्मार्थकामा नातिसुखदा भवन्ति तथोपाधित्यागेन सेवमाने भवन्नपि मोक्षो न साक्षान् न च झटिति किन्तु कथमपि परमात्मांश एवायमित्यनुसन्धानाभ्यासेनैव परमात्मन एव भवति । तत्र तत्र साक्षात् परमात्माकारेणाप्रकाशात् तस्मात् ताभ्यां श्रेयांसि न भवन्ति । अथोपाधिदृष्ट्यापि श्रीविष्णुं सेवमाने सत्त्वस्य शान्तत्वात् धर्मार्थकामा अपि सुखदाः । तत्र निष्कामत्वेन तु तं सेवमाने "सत्त्वात् सञ्जायते ज्ञानम्" (गीता १४।१७) इति । "कैवल्यं सात्त्विकं ज्ञानम्" (भा० ११।२५।२४) इति चोक्तेर्मोक्षस्य साक्षात् ।
अत उक्तं स्कान्दे —

बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥ ५२ ॥ इति ।

उपाधिपरित्यागेन तु पञ्चमपुरुषार्थो भक्तिरेव भवति तस्य परमात्माकारेणैव प्रकाशात् । तस्मात् श्रीविष्णोरेव श्रेयांसि स्युरिति ।
१३ । अत्र तु यत् त्रयाणामभेदवाक्येनोपजप्तमतयो विवदन्ते तत्रेदं ब्रूमः — यद्यपि तारतम्यमिदमधिष्ठानगतमेव अधिष्ठाता तु परः पुरुष एक एवेति भेदासम्भवात् । सत्यमेवाभेदवाक्यं तथापि तस्य तत्र तत्र साक्षात्त्वासाक्षात्त्वभेदेन प्रकाशेन तारतम्यं दुर्निवारमेवेति सदृष्टान्तमाह (भा० १।२।२४) —

पार्थिवाद् दारुणो धूमस्तस्मादग्निस्त्रयीमयः ।
तमसस्तु रजस्तस्मात् सत्त्वं यद् ब्रह्मदर्शनम् ॥ ५३ ॥

पार्थिवान् न तु धूमवदंशेनाग्नेयात् तत एव वेदोक्तकर्मणः साक्षात् प्रवृत्तिप्रकाशरहिताद् दारुणो यज्ञीयान् मथनकाष्ठात् सकाशादंशेनाग्नेयो धूमस्त्रयीमयः पूर्वापेक्षया वेदोक्तकर्माधिक्याविर्भावास्पदम् । तस्मादपि स्वयमग्निस्त्रयीमयः साक्षात् तदुक्तकर्माविर्भावास्पदम् ।

एवं काष्ठस्थानीयात् सत्त्वगुणविदूरात् तमसः सकाशाद्धूमस्थानीयं किञ्चित् सत्त्वसन्निहितं रजो ब्रह्मदर्शनम् । वेदोक्तकर्मस्थानीयस्य तत्तदवतारिणः पुरुषस्य प्रकाशद्वारम् । तुशब्देन लयात्मकात् तमसः सकाशाद् रजसः सोपाधिकज्ञानहेतुत्वेनेषद्गुणच्छविप्रादुर्भावरूपं किञ्चित् ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा विक्षेपकत्वात् ।

यदग्निस्थानीयं सत्त्वं तत् साक्षात् ब्रह्मणो दर्शनम् । साक्षादेव सम्यक् तत्तद्गुणरूपाविर्भावद्वारं शान्तस्वच्छस्वभावात्मकत्वात् । अतो ब्रह्मशिवयोरसाक्षात्त्वं श्रीविष्णौ तु साक्षात्त्वं सिद्धमिति भावः ।

तथा च श्रीवामनपुराणे —

ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः ।
ब्रह्मणि ब्रह्मरूपः स शिवरूपः शिवे स्थितः ॥ ५४ ॥
पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः ॥ ५५ ॥ इति ।

तदुक्तं ब्रह्मसंहितायाम् (ब्र० सं० ५।४९, ५।४५-४६) —

भास्वान् यथाश्मशकलेषु निजेषु तेजः स्वीयं कियत् प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एव जगदण्डविधानकर्ता गोविन्दमादिपुरुषं तमहं भजामि ॥ ५६ ॥
क्षीरं यथा दधि विकारविशेषयोगात् सञ्जायते न तु ततः पृथगस्ति हेतोः ।
यः शम्भुतामपि तथा समुपैति कार्याद् गोविन्दमादिपुरुषं तमहं भजामि ॥ ५७ ॥
दीपार्चिरेव हि दशान्तरमभ्युपेत्य दीपायते विवृतहेतुसमानधर्मा ।
यस्तादृगेव हि च विष्णुतया विभाति गोविन्दमादिपुरुषं तमहं भजामि ॥ ५८ ॥
इत्यादि ।

न च दधिदृष्टान्तेन विकारित्वमायातम् । तस्य "श्रुतेस्तु शब्दमूलत्वात्" (ब्र० सू० २।१।२७) इति न्यायेन मुहुः परिहृतत्वात् ।

यथोक्तम् "यत उदयास्तमयौ विकृतेर्मृदिवाविकृतात्" (भा० १०।८७।१५) इति ।

दृष्टान्तत्रयेण तु क्रमेणेदं लभ्यते — सूर्यकान्तस्थानीये ब्रह्मोपाधौ सूर्यस्येव तस्य किञ्चित् प्रकाशः । दधिस्थानीये शम्भूपाधौ क्षीरस्थानीयस्य न तादृगपि प्रकाशः । दशान्तरस्थानीये विष्णूपाधौ तु पूर्ण एव प्रकाश इति ॥ श्रीसूतः ॥

१४ । एवमेवाह त्रिभिः (भा० १०।८८।३-५) —

शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृतः ।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ५९ ॥

ततो विकारा अभवन् षोडशामीषु किञ्चन ।
उपाधावन् विभूतीनां सर्वासामश्नुते गतिम् ॥ ६० ॥
हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः ।
स सर्वदृगुपद्रष्टा तं भजन् निर्गुणो भवेत् ॥ ६१ ॥

शश्वच्छक्तियुतः प्रथमतस्तावन् नित्यमेव शक्त्या गुणसाम्यावस्थप्रकृतिरूपोपाधिना युक्तः । गुणक्षोभे सति त्रिलिङ्गो गुणत्रयोपाधिः । प्रकटैश्च सद्भिस्तैर्गुणैः संवृतश्च ।
ननु तम उपाधित्वमेव तस्य श्रूयते कथं तत्तदुपाधित्वम् ? तत्राह — वैकारिक इति । अहमहन्तत्त्वं हि तत्तद्रूपेण त्रिधा । स च तदधिष्ठातेत्यर्थः । मुख्यतया नास्तां नामान्य-द्गुणद्वयं गौणतया त्वास्त एवेत्यर्थः ।
ततस्तेन भगवत्प्रतिनिधिरूपेणाधिष्ठितादहन्तत्त्वात् षोडशविकारा ये अभवन्नमीषु विकारेषु मध्ये सर्वासां विभूतीनां सम्बन्धिनं किञ्चन उपाधावन् तदुपाधिकत्वेन तमुपा-सीनो गतिं प्राप्य्ं फलं लभते ।
हि प्रसिद्धौ हेतौ वा । हरिस्तु प्रकृतेरुपाधितः परस्तद्धर्मैरस्पृष्टः । अत एव निर्गुणोऽपि कुतस्त्रिलिङ्गत्वादिकमिति भावः ।
तत्र हेतुः — साक्षादेव पुरुष ईश्वरः । न तु प्रतिबिम्बवद् व्यवधानेनेत्यर्थः । अतो "विद्याविद्ये मम तनु" (भा० ११।११।३) इतिवत् तनुशब्दोपादानात् कुत्रचित् सत्त्वशक्तित्वश्रवणमपि प्रेक्षादिमात्रेणोपकारित्वादिति भावः ।
अत एव सर्वेषां शिवब्रह्मादीनां दृक्ज्ञानं यस्मात् तथाभूतः सन्नुपद्रष्टा तदादिसाक्षी भवति । अतस्तं भजन् निर्गुणो भवेद् गुणातीतफलभाग् भवतीति ॥ श्रीशुकः ॥

१५ । अत एव विष्णोरेव परमपुरुषेण साक्षादभेदोक्तिमाह (भा० २।६।३१) —

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ६२ ॥ इति ।

अहं ब्रह्मा । श्रुतिश्चात्र (महोप०) —

स ब्रह्मणा सृजति स रुद्रेण विलापयति ।
सोऽनुत्पत्तिरलय एव हरिः परः परमानन्दः ॥ ६३ ॥
इति महोपनिषदि ॥ श्रीब्रह्मा श्रीनारदम् ॥

१६ । तत्रैवाह (भा० १२।५।१) —

अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान् हरिः ।
यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ ६४ ॥ इति ॥

अत्र श्रीविष्णुर्न कथित इति तेन साक्षादभेद एवेत्यायातम् । तदुक्तम् "स उ एव विष्णुः" (भा० ३।८।१५) इति ।
श्रुतिश्च "पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजोऽजायत यतः प्रजाः सर्वाणि भूतानि" (महा०) इति ।
"नारायणः परं ब्रह्म तत्त्वं नारायणः परम् ॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्" (महा० ११।४, १२।१) इति ।
"एको ह नारायण आसीन् न ब्रह्मा न च शङ्करः । स मुनिर्भूत्वा समचिन्तयत् । तत एव व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्वरुणरुद्रेन्द्राः" (महा० १।१) इति च ।
तस्मात् तस्यैव वर्णनीयत्वमपि युक्तम् ॥ श्रीशुकः ॥

१७ । ननु "त्रयाणामेकभावानां यो न पश्यति वै भिदाम्" (भा० ४।७।५४) । तथा "न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते" (भा० १२।१०।२२) इत्यादावभेद एव श्रूयते । पुराणान्तरे च विष्णुतस्तयोर्भेदे नरकः श्रूयते ।
सत्यं वयमपि भेदं न ब्रूमः । परमपुरुषस्यैव तत्तद्रूपमित्येकात्मत्वेनैवोपक्रान्तत्वात् । शिवो ब्रह्मा च भिन्नस्वभावादितया दृश्यमानोऽपि प्रलये सृष्टौ न तस्मात् स्वतन्त्र एवान्य ईश्वर इति न मन्तव्यं किन्तु विष्ण्वात्मक एव स स इति हि तत्रार्थः । तदुक्तम् "ब्रह्मणि ब्रह्मरूपः सः" (वामन० पु०) इत्यादि ।
न च प्रकाशस्य साक्षादसाक्षाद्रूपत्वादि तारतम्यं वयं कल्पयामः परं शास्त्रमेव वदति । शास्त्रं तु दर्शितम् । एवं भगवदवतारानुक्रमणिकासु त्रयाणां भेदमङ्गीकृत्यैव केवलस्य श्रीदत्तस्य गणना सोमदुर्वासोस्त्वगणना । किं च ब्राह्मे ब्रह्मवैवर्ते च ब्रह्मवाक्यम —

> नाहं शिवो न चान्ये च तच्छक्त्येकाङ्गभागिनः ।
> बालक्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युतः ॥ ६५ ॥ इति ।

अत एव श्रुतौ "यं कामये तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्" इत्युक्त्वा । "मम योनिरप्स्वन्तः" (ऋग्वेद, देवीसूक्ते १०।१२५।५, ७) इति शक्तिवचनम् । अपस्वन्तरिति कारणोदशायी सूच्यते "आपो नारा इति प्रोक्ताः" (वि० पु० १।४।६, अग्नि १७।७) इत्यादेः ।
योनिः कारणम् ।
एवमेव स्कान्दे —

> ब्रह्मेशानादिभिर्देवैर्यत् प्राप्तुं नैव शक्यते ।
> तद्वत् स्वभावः कैवल्यं स भवान् केवलो हरे ॥ ६६ ॥ इति ।

तथा विष्णुसामान्यदर्शिनां दोषश्च श्रूयते । यथा वैष्णवतन्त्रे —

> न लभेयुः पुनर्भक्तिं हरेरैकान्तिकीं जडाः ।
> एकाग्रमनसश्चापि विष्णुसामान्यदर्शिनः ॥ ६७ ॥ इति ।

अन्यत्र (पाद्मे ६।२३५।९) —

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाषण्डी भवेद्ध्रुवम् ॥ ६८ ॥ इति ।

तथा च मन्त्रवर्णः "मध्ये वामनमासीनं विश्वेदेवा उपासते" इति ।
ननु क्वचिदन्यशास्त्रे शिवस्यैव परमदेवत्वमुच्यते ? सत्यं तथापि शास्त्रस्य सारासारत्वविवेकेन तद्बाधितमिति । तथा च पाद्मशैवयोरुमां प्रति श्रीशिवेन श्रीविष्णुवाक्यमनुकृतम् (पाद्मे ६।७१।१०६-१०७) —

त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदा ।
द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥ ६९ ॥
स्वागमैः कल्पितैस्त्वं तु जनान् मद्विमुखान् कुरु ।
मां च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा ॥ ७० ॥ इति ।

वाराहे च (७०।३५-३६) —

एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति ।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ ७१ ॥
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज ।
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु ॥ ७२ ॥ इति ।

पुराणानां च मध्ये यद्यत् सात्त्विककल्पकथामयं तत्तत् श्रीविष्णुमहिमपरम् । यद्यत् तामसकल्पकथामयं तत्तच्छिवादिमहिमपरमिति श्रीविष्णुप्रतिपादकपुराणस्यैव सम्यग्ज्ञानप्रदत्वम् । "सत्त्वात् सञ्जायते ज्ञानम्" (गीता १४।१७) इति दर्शनात् । तथा च मात्स्ये (५३।६७-६८) —

सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ ७३ ॥
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च ।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ॥ ७४ ॥
वैष्णवं नारदीयं च तथा भागवतं शुभे ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ ७५ ॥
ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्म्यं राजसानि निगद्यते ॥ ७६ ॥
मात्स्यं कूर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयकं तथैतानि तामसानि निगद्यते ॥ ७७ ॥ इत्यादि ।

अत उक्तं स्कान्दे षण्मुखं प्रति श्रीशिवेन —

> शिवशास्त्रेषु तद् ग्राह्यं भगवच्छास्त्रयोगि यत् ।
> परमो विष्णुरेवैकस्तज्ज्ञानं मोक्षसाधनम् ॥ ७८ ॥
> शास्त्राणां निर्णयस्त्वेष तदन्यन् मोहनाय हि ॥ ७९ ॥ इति ।

तथैव च द्रष्टुं मोक्षधर्मे नारायणोपाख्याने । वैशम्पायन उवाच (मोक्षधर्मे ३४९।६४-७३) —

> साङ्ख्यं योगं पञ्चरात्रं वेदाः पाशुपतं तथा ।
> ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ॥ ८० ॥
> साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते ।
> हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः ॥ ८१ ॥
> अपान्तरतमाश्चैव वेदाचार्यः स उच्यते ।
> प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन ॥ ८२ ॥
> उमापतिर्भूतपतिः श्रीकन्ठो ब्रह्मणः सुतः ।
> उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः ॥ ८३ ॥
> पञ्चरात्रस्य कृत्स्नस्य वक्ता तु भगवान् स्वयम् ।
> सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ॥ ८४ ॥
> यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः ।
> न चैनमेवं जानन्ति तमोभूता विशां पते ॥ ८५ ॥
> तमेव शास्त्रकर्तारः प्रवदन्ति मनीषिणः ।
> निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम ॥ ८६ ॥
> निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः ।
> ससंशयान् हेतुबलान् नाध्यावसति माधवः ॥ ८७ ॥
> पञ्चरात्रविदो ये तु यथाक्रमपरा नृप ।
> एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै ॥ ८८ ॥
> साङ्ख्यं च योगं च सनातने द्वे वेदाश्च सर्वे निखिलेन राजन् ।
> सर्वैः समस्तैरृषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम् ॥ ८९ ॥ इति ।

अत्र "अपान्तरतमाः" इति श्रीकृष्णद्वैपायनस्यैव जन्मान्तरनामविशेष इति तत्रैव ज्ञेयम् । अत्रैवं व्याख्येयम — पञ्चरात्रसम्मतं श्रीनारायणमेव सर्वोत्तमत्वेन वक्तुं नानामतं दर्शयति "साङ्ख्यम्" इति । तत्र पञ्चरात्रमेव गरिष्ठमाचष्टे "पञ्चरात्रस्येत्यादौ भगवान् स्वयम्" इति ।
अथ "द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च" (गीता १६।६) इति श्रीगीतासु श्रूयते । यदेव तानि "नानामतानि" इत्युक्तं तत् त्वासुरप्रकृत्यनुसारेणेत्येव ज्ञेयम् । दैवप्रकृतयस्तु तत्तत्सर्वावलोकनेन पञ्चरात्रप्रतिपाद्ये श्रीनारायण एव पर्यवस्यन्तीत्याह "सर्वेषु" इति । आसुरांस्तु निन्दति "न चैनम्" इति । तदुक्तं विष्णुधर्माग्निपुराणयोः (अग्नि ३८१।३९) —

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥ ९० ॥ इति ।

ननु तत्र तत्र नानामतय एव दृश्यन्ते तत्राह "तमेव" इति । पञ्चरात्रेतरशास्त्रकर्तारो हि द्विविधाः — किञ्चिज्ज्ञाः सर्वज्ञाश्च । तत्राद्या यथा — स्वस्वज्ञानानुसारेण यत् किञ्चित् तत्त्वैकदेशं वदन्ति तत् तु समुद्रैकदेशवर्णनं समुद्र इव पूर्णतत्त्वे श्रीनारायण एव पर्यवस्यतीति ते तमेव किञ्चिद् वदन्ति ।
ये तु सर्वज्ञास्ते चैवमभिप्रयन्ति — नास्माभिरासुराणां मोहनार्थमेव कृतानि शास्त्राणि किन्तु दैवानां व्यतिरेकेण बोधनार्थम् । ते हि रजस्तमःशबलस्य खण्डस्य च तत्त्वस्य तथा क्लेशबहुलस्य साधनस्य च प्रतिपादकान्येतानि शास्त्राणि दृष्ट्वा वेदांश्च दुर्गमान् दृष्ट्वा च निर्विद्य सर्ववेदार्थसारस्य शुद्धाखण्डतत्त्वश्रीनारायणस्य सुखमयतदाराधनस्य च सुष्ठु प्रतिपादके पञ्चरात्रे एव गाढं प्रवेक्ष्यन्तीति । तदेतदाह "निःसंशयेषु" इति ।
तस्माज् झटिति वेदार्थप्रतिपत्तये पञ्चरात्रमेवाध्येतव्यमित्याह "पञ्चरात्र" इति । यत एवं तत उपसंहरति "साङ्ख्यं च योगं च" इति । तदेवं पञ्चरात्रप्रतिपाद्यस्य श्रीभगवत एवमुत्कर्षे स्थिते "आत्मारामाश्च मुनयः" (भा० १।७।१०) इत्याद्यसकृदपूर्वमुपदिशता श्रीभागवतेन प्रतिपाद्यरूपस्य तस्य किमुतेत्यपि विवेचनीयम् ।
तदेतदुक्तानुसारेण सदाशिवेश्वरत्रिदेवीरूपव्यूहोऽपि निरस्तः । तस्मादेव च श्रीभगवत्पुरुषयोरेव शैवागमे सदाशिवादिसञ्ज्ञे तन्महिमख्यापनाय धृत इति गम्यते । सर्वशास्त्रशिरोमणौ श्रीभागवते तु त्रिदेव्यामेव तत्तारतम्यजिज्ञासा पुरुषभगवतोस्तु तत्प्रसङ्ग एव नास्ति ।
भा० ३।१४।२८ —

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया ।
आज्ञाकरी यस्य पिशाचचर्या अहो विभूम्नश्चरितं विडम्बनम् ॥ ९१ ॥

इत्यत्र तृतीये गुणावतारत्वेन परमेश्वराभेददृष्ट्या तथात्वमुक्तमिति ज्ञेयम् ।
ननु (भा० ८।७।३१) —

न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ।
ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद् ब्रह्म निरस्तभेदम् ॥ ९२ ॥

इत्यत्र तस्य परत्वं श्रूयत एवाष्टमे ?
मैवम् । "महिम्ना स्तूयमाना हि देवा वीर्येण वर्धन्ते" इति वैदिकन्यायेन तदयुक्तेः । स हि स्तवः कालकूटनाशार्थमेव । तत्रैव "प्रीते हरौ भगवति प्रीयेऽहं सचराचर" (भा० ८।७।४०) इति ।
तथा नवमे (भा० ९।४।५६) —

वयं न तात प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोषाः ।
भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥ ९३ ॥ इति ।

"एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः" (भा० ५।१७।२३) इति च तद्वाक्यविरोधात् । अथवा यत् शिवस्य ज्योतिस्तत्र स्थितं परमात्माख्यं चैतन्यं तत्सम्यग्ज्ञाने तस्याप्यक्षमता युक्तैव । यदुक्तम् (भा० १०।८७।४१) —

द्युपतय एव ते न ययुरन्तमनन्ततया ।
त्वमपि यदन्तराण्डनिचया ननु सावरणाः ॥ ९४ ॥ इति ।

ब्रह्मसंहितामते तु भगवदङ्गविशेष एव सदाशिवः । न त्वन्यः । यथा तत्रैव सर्वादिकारणगोविन्दकथने (ब्र० सं० ५।७-८) —

नियतिः सा रमादेवी तत्प्रिया तद्वशंवदा ।
तल्लिङ्गं भगवान् शम्भुर्ज्योतीरूपः सनातनः ॥ ९५ ॥
या योनिः सा परा शक्तिः ॥ ९६ ॥ इत्यादि ।

"तस्मिन्नाविरभूल्लिङ्गे महाविष्णुः" (ब्र० सं० ५।१०) इत्याद्यन्तम् ।
तदेतदभिप्रेत्य सदाशिवत्वादिप्रसिद्धिमप्याक्षिप्याह (भा० १।१८।२१) —

अथापि यत्पदनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः ॥ ९७ ॥

स्पष्टम् ॥ श्रीसूतः ॥

१८ । तस्मात् "नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः" (ब्रह्मवैवर्ते) इत्येवं साध्वेव इत्याह "ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः" (भा० १०।६८।३७) इति ।
स्पष्टम् ॥ श्रीबलदेवः ॥

१९ । अथ परमात्मपरिकरेषु जीवस्तस्य च तटस्थलक्षणम् "क्षेत्रज्ञ एताः" (भा० ५।११।१२) इत्यत्रोक्तम् ।
स्वरूपलक्षणं पाद्मोत्तरखण्डादिकमनुसृत्य श्रीरामानुजाचार्यमताचार्यवरेण परमवृद्धश्रीवैष्णवसम्प्रदायगुरुणा श्रीजामातृमुनिनोपदिष्टम् । तत्र प्रणवव्याख्याने पाद्मोत्तरखण्डं यथा (पाद्मे ६।२२६।३४-३७) —

ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः ।
न जातो निर्विकारश्च एकरूपः स्वरूपभाक् ॥ ९८ ॥
अणुर्नित्यो व्याप्तिशीलश्चिदानन्दात्मकस्तथा ।

अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः ॥ ९९ ॥
अदाह्योऽच्छेद्यो ह्यक्लेद्यस्त्वशोष्योऽक्षर एव च ।
एवमादिगुणैर्युक्तः शेषभूतः परस्य वै ॥ १०० ॥
मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा ।
दासभूतो हरेरेव नान्यस्यैव कदाचन ॥ १०१ ॥ इति ।

श्रीजामातृमुनिनाप्युपदिष्टं यथा —

आत्मा न देवो न नरो न तिर्यक् स्थावरो न च ।
न देहो नेन्द्रियं नैव मनः प्राणो न नापि धीः ॥ १०२ ॥
न जडो न विकारी च ज्ञानमात्रात्मको न च ।
स्वस्मै स्वयम्प्रकाशः स्यादेकरूपः स्वरूपभाक् ॥ १०३ ॥
चेतनो व्याप्तिशीलश्च चिदानन्दात्मकस्तथा ।
अहमर्थः प्रतिक्षेत्रं भिन्नोऽणुर्नित्यनिर्मलः ॥ १०४ ॥
तथा ज्ञातृत्वकर्तृत्वभोक्तृत्वनिजधर्मकः ।
परमात्मैकशेषत्वस्वभावः सर्वदा स्वतः ॥ १०५ ॥ इति ।

श्रीरामानुजभाष्यानुसारेण व्याख्या चेयम् । तत्र देवादित्वं निरस्तमेवास्ति तत्त्वसन्दर्भे (भा० ११।३।३९) —

अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ।
सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ १०६ ॥

इत्यनेन । देहादित्वं निरस्यन्नाह (भा० ११।१०।८) —

विलक्षणः स्थूलसूक्ष्माद् देहादात्मेक्षिता स्वदृक् ।
यथाग्निर्दारुणो दाह्याद् दाहकोऽन्यः प्रकाशकः ॥ १०७ ॥

विलक्षणत्वे हेतुः — ईक्षिता तस्य तस्य द्रष्टा प्रकाशकश्च स्वयं तु स्वदृक् स्वप्रकाश इति ॥ श्रीभगवान् ॥

२० । जडत्वं निरस्यन्नाह (भा० ११।१३।२७) —

जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः ।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ १०८ ॥

या तु "मयि तुर्ये स्थितो जह्यात्" (भा० ११।१३।२८) इत्यादौ परमेश्वरेऽपि तुर्यत्वप्रसिद्धिः । सान्यथैव (भा० ११।१५।१६) —

विराड् हिरण्यगर्भश्च कारणं चेत्युपाधयः ।
ईश्वरस्य यत् त्रिभिर्हीनं तुरीयं तत्पदं विदुः ॥ १०९ ॥

इत्याद्युक्तेः ।
वासुदेवस्य चतुर्व्यूहे तुर्यकक्षाक्रान्तत्वाद्वा ॥ श्रीभगवान् ॥

२१ । विकारित्वं निरस्यन्नाह (भा० ११।७।४८) —

विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः ।
कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना ॥ ११० ॥

चन्द्रस्य जलमयमण्डलत्वात् कलानां सूर्यप्रतिच्छविरूपज्योतिरात्मकत्वाद् यथा कलानामेव जन्माद्या नाशान्ता भावाः । न तु चन्द्रस्य तथा देहस्यैव ते भावा अव्यक्तवर्त्मना कालेन भवन्ति न त्वात्मन इत्यर्थः ॥ श्रीदत्तात्रेयो यदुम् ॥

२२ । "ज्ञानमात्रात्मको न च" इति । किं तर्हि ? ज्ञानमात्रत्वेऽपि ज्ञानशक्तित्वं प्रकाशस्य प्रकाशनशक्तित्ववत् तादृशत्वमपि । भा० ११।३।३७ —

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद् व्यभिचारिणां हि ।
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥ १११ ॥

इत्यनेन तत्त्वसन्दर्भ एव दर्शितम् । अत्र उपलब्धिमात्रत्वेऽपि सवनवित्त्वेनोक्तेः स्पष्टमेव तादृशज्ञानशक्तित्वम् । अत एव "शुद्धो विचष्टे ह्यविशुद्धकर्तुः" (भा० ५।११।१२) इत्युक्तम् । प्रकारान्तरेणापि तदाह (भा० ३।२६।५) —

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ११२ ॥

अत्र "विलोक्य" इत्यनेन "मुमुहे" इत्यनेन "ज्ञानगूहया" इत्यनेन च पराग्भूतायाः प्रकृतेस्तत्कृतादज्ञानाच्च प्रत्यग्भूतं यज्ज्ञानं तत्तस्य स्वरूपशक्तिरेव स्यादिति गम्यते । श्रीगीतोपनिषदश्च तथा "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (गीता ५।१५) इति ॥ श्रीकपिलदेवः ॥

२३ । शक्त्यन्तरं चाहुः (भा० १०।८७।३८) —

स यदजया त्वजामनुशयीत गुणांश्च जुषन् ।
भजति सरूपतां तदनु मृत्युमपेतभगः ॥ ११३ ॥ इति ।

टीका च — स तु जीवो यद् यस्मादजया मायया अजामविद्यामनुशयीत आलिङ्गयेत ततो गुणांश्च देहेन्द्रियादीन् जुषन् सेवमान आत्मतया अध्यस्यन् तदनु तदनन्तरं सरूपतां तद्धर्मयोगं च जुषनपेतभगः पिहितानन्दादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति इत्येषा ॥ श्रुतयः ॥

२४ । तथा (भा० ६।५।१५) —

तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ।
तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ ११४ ॥

तस्याः पुंश्चलीरूपाया मायायाः सङ्गेन भ्रंशितमैश्वर्यं किञ्चित् स्वीयज्ञानादिसामर्थ्यं यस्य तम् । तस्या गतीः संसरन्तं गच्छन्तं जीवं स्वस्वरूपमबुधस्य अजानत इत्युत्तरेणान्वयः ॥ हर्यश्वाः ॥

२५ । तथा "ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्" (भा० ३।७।९) इति ।
ईश्वरस्य किञ्चिज्ज्ञानादिशक्तिमतः ॥ श्रीमैत्रेयः ॥

२६ । तथा (भा० ४।२५।६२) —

विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः ।
नेच्छन्ननुकरोत्यज्ञः क्लैब्यात् क्रीडामृगो यथा ॥ ११५ ॥

महिष्या पुरञ्जन्या विप्रलब्धः पुरञ्जनः सर्वया प्रकृत्या ज्ञानादिरूपया वञ्चितस्त्याजितः सन् नेच्छन् तदिच्छयैवेत्यर्थः । अनुकरोति तद्धर्ममात्मन्यध्यस्यति ।
अत्र जीवस्य शक्तिमत्तायाम् "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (ब्र० सू० ३।२।५) इत्येतत् सूत्रमप्यनुसन्धेयम् ॥ श्रीनारदः श्रीप्राचीनबर्हिषम् ॥

२७ । पूर्वोक्तमेवार्थं व्यञ्जयितुं स्वस्मै स्वयम्प्रकाश इत्युक्तम् । तथाभूतत्वं च "विलक्षणः" इत्याद्युक्तपद्य एव "स्वदृक्" इत्यनेन व्यक्तमस्ति ।
तत्र प्रकाशस्तावद् गुणद्रव्यभेदेन द्विविधः — प्रथमो निजाश्रयस्य स्फूर्तिरूपः । द्वितीयः स्वपरस्फूर्तिनिदानं वस्तुविशेषः ।
तत्रात्मनो द्रव्यत्वादयमेव गृह्यते — यथा दीपश्चक्षुः प्रकाशयन् स्वपरस्फूर्तिं स्वयमेव करोति न तु घटादिप्रकाशवत् तदादिसापेक्षः । तस्मादयं स्वयम्प्रकाशः । तथापि स्वं प्रति न प्रकाशते यत एव जड इत्युच्यते ।
आत्मा तु स्वं परं च प्रकाशयन् स्वात्मानं प्रति प्रकाशमानत्वात् स्वस्मै स्वयम्प्रकाशः । यत एव चिद्रूप उच्यते ।
तदुक्तमन्यैरपि — स्वयम्प्रकाशत्वं स्वव्यवहारे परानपेक्षत्वम् । अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं वेति ।

तत्र पूर्वत्र परानपेक्ष्यत्वस्वरूपलक्षणे दीपसाधर्म्यजडत्ववारणाय स्वस्मैपदमपेक्ष्यमुत्तरत्र तु स्पष्टतार्थम् । अतः स्वदृक् स्वस्मै स्वयम्प्रकाश इत्यर्थः ।
न चासौ परमात्मप्रकाश्यत्वे घटवत् परप्रकाश्यः परमात्मनस्तत्परमस्वरूपत्वेन परप्रकाश्यत्वाभावात् । एवमेवाह द्वाभ्याम् (भा० ११।२२।३०–३१) —

ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते ।
वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिभूतमधिदैवमन्यत् ॥ ११६ ॥
दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिध्यति यः स्वतः खे ।
आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिः ॥ ११७ ॥

विकल्पं भेदं तद्बुद्धीश्च । अनेकधात्वं प्रपञ्चयति — वैकारिक इति । अनेकविकारवानप्यसौ स्थूलदृष्ट्या तावत् त्रिविधः ।
त्रैविध्यमाह — अध्यात्म इत्यादिना । तानि क्रमेणाह — दृगादित्रयेण । वपुरंशः । अत्र रन्ध्रे दृग्गोलोके प्रविष्टं तत् त्रयं च परस्परमेव सिध्यति न तु स्वतः ।
यस्तु खे आकाशे अर्को वर्तते स पुनः स्वतः सिध्यति । चक्षुर्विषयत्वेऽपि स्वविरोधिनः प्रतियोग्यपेक्षाभावमात्रेण स्वत इत्युक्तम् ।
एवं यथा मण्डलात्मार्कः स्वतः सिध्यति तथात्मापीत्याह — यद् यतः पूर्वोक्तदृष्टान्तहेतोरात्मा एषामध्यात्मादीनां योऽपर आद्यस्तेषामाश्रयः सोऽपि स्वतः सिध्यति किन्तु स्वयानुभूत्या इति चिद्रूपत्वाद् विशेषः । न केवलमेतावदपि तु अखिलानां परस्परसिद्धानां सिद्धिर्यस्मात् तथाभूतः सन्निति ॥ श्रीभगवान् ॥

२८ । यस्मात् स्वरूपभूतयैव शक्त्या तथा प्रकाशते तस्मादेकरूपस्वरूपभाक्त्वमपि दीपवदेव । “नात्मा जजान” (भा० ११।३।३८) इत्यादौ “उपलब्धिमात्रम्” इत्यनेनैवोक्तं मात्रपदं तद्धर्माणामपि स्वरूपानतिरिक्तत्वं ध्वनयति ।
अथ चेतनत्वं नाम स्वस्य चिद्रूपत्वेऽप्यन्यस्य देहादेश्चेतयितृत्वं दीपादिप्रकाशस्य प्रकाशयितृत्ववत् । तदेतत् “विलक्षणः” (भा० ११।१०।८) इत्यादावेव दृष्टान्तेनोक्तम् । “प्रकाशकः” इति चेतयितृत्वे हेतुः ।
व्याप्तिशीलत्वमुदाहरिष्यमाणे “आत्मा” (भा० ७।७।१९) इत्यादौ श्रीप्रह्लादवाक्ये व्यापक इत्यनेनोक्तं व्याप्तिशीलत्वमतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावत्वम् ।
“ज्ञानमात्रात्मको न च” इत्यत्र चिदानन्दात्मक इत्यपि हेत्वन्तरम् । तत्र तस्य जडप्रतियोगित्वेन ज्ञानत्वं दुःखप्रतियोगित्वेन तु ज्ञानत्वमानन्दत्वं च । ज्ञानत्वं तूदाहृतम् । आनन्दत्वं च निरुपाधिप्रेमास्पदत्वेन साधयति । भा० १०।१४।५४ —

तस्मात् प्रियतमः स्वात्मा सर्वेषामेव देहिनाम् ।
तदर्थमेव सकलं जगद् एतच् चराचरम् ॥ ११८ ॥

स्पष्टम् ॥ श्रीशुकः ॥

२९ । तस्मिंश्चानन्दात्मके ज्ञाने प्रतिबिम्बं युष्मदर्थत्वं न भवति किन्त्वात्मत्वादस्मदर्थत्वमेव । तच्चास्मदर्थत्वमहम्भाव एव ।
ततोऽहमित्येतच्छब्दाभिधेयाकारमेव ज्ञानं शुद्ध आत्मा प्रकृत्यावेशोऽन्यथा नोपपद्यते । यत एवावेशात् तदीयसङ्गात एवाहमित्यहम्भावान्तरं प्राप्नोति तदेतदभिप्रेत्य तस्याहमर्थत्वमाह (भा० ३।२६।६) —

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ११९ ॥

पराभिध्यानेन प्रकृत्यावेशेन प्रकृतिरेवाहमिति मननेन प्रकृतेर्गुणैः क्रियमाणेषु कर्मसु कर्तृत्वमात्मनि मन्यते । अत्र निरहम्भावस्य पराभिध्यानासम्भवात् परावेशजाताहङ्कारस्य चावरकत्वादस्त्येव तस्मिन्नन्योऽहम्भावविशेषः । स च शुद्धस्वरूपमात्रनिष्ठत्वान् न संसारहेतुरिति स्पष्टम् । एतदेवाहङ्कारद्वयम् "सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्न" (भा० ११।३।३९) इत्यत्र दर्शितम् ।
उपाध्यभिमानात्मकस्याहङ्कारस्य प्रसुप्तत्वात् "तदनुस्मृतिर्नः" इत्यनेन "सुखमहमस्वाप्स्वम्" इत्यात्मनोऽहन्तयैव परामर्शाच्च अत एव "मामहं नाज्ञासिषम्" इत्यत्र परामर्शेऽपि उपाध्यभिमानिनोऽनुसन्धानाभावः । अन्यस्य त्वज्ञानसाक्षित्वेनानुसन्धानमिति दिक् ॥ श्रीकपिलदेवः ॥

३० । तथा (भा० ११।२२।५२) —

नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् ।
एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यते ॥ १२० ॥

पूर्ववत् ॥ श्रीभगवान् ॥

३१ । एवमेव स्वप्नदृष्टान्तमपि घटयन्नाह (भा० ३।७।१०) —

यदर्थेन विनामुष्य पुंस आत्मविपर्ययः ।
प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥ १२१ ॥

उपद्रष्टुरमुष्येति स्वप्नद्रष्ट्रा अमुना जीवेनेत्यर्थः ॥ श्रीमैत्रेयः ॥

३२ । साधिते च स्वरूपभूतेऽहम्भावे प्रतिक्षेत्रं भिन्नत्वमपि साधितम् । यत् तु (भा० ११।१३।२२) —

वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः ।
कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः ॥ १२२ ॥

इत्यादौ ज्ञानिलौकिकगुरुरीतिं तदीयप्राकृतदृष्टिं वानुसृत्य स्वस्य जीवान्तरसाधारण्यकल्पनामये श्रीहंसदेववाक्ये जीवात्मनामेकत्वं तत् खलु अंशभेदेऽपि ज्ञानेच्छून् प्रति ज्ञानोपयोगित्वेन तमविविच्यैव समानाकारत्वेनाभेदव्यपदेशो यथा तत्रैव (भा० ११।१३।२३) —

पञ्चात्मकेषु भूतेषु समानेष्वपि वस्तुतः ।
को भवानिति वः प्रश्नो वाचारम्भो ह्यनर्थकः ॥ १२३ ॥ इति ।

तत्राप्यंशभेदोऽस्त्येव । अत उक्तं स्वयं भगवता "शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" (गीता ५।१८) इति । "निर्दोषं हि समं ब्रह्म" (गीता ५।१९) इत्यादि च । अत्र ब्रह्मेति जीवब्रह्मैवोच्यते । यथा "ययाहमेतत् सदसत् स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे" (भा० १।५।२७) इति ।
मयि ब्रह्मणि देहात्मकं परे ब्रह्मणि च जगदात्मकं सदसत् कार्यकारणसङ्घातं स्वविषयकमायया जीवमायाख्यया देह एवाहं तथा इन्द्रचन्द्राद्यात्मकं जगदेवेश्वर इतीदं कल्पितमेव यया मत्या पश्ये पश्यामीत्यर्थः ।
समानकारणत्वादेव पूर्ववदन्यत्र च सोऽहं स च त्वमिति ।
तदेवं सर्वेषामेव जीवानामेकाकारत्वे सति (भा० ११।१०।३२) —

यावत् स्याद् गुणवैषम्यं तावन् नानात्वमात्मनः ।
नानात्वमात्मनो यावत् पारतन्त्र्यं तदैव हि ॥ १२४ ॥

इत्यादिषु देवादिदेहभेदकृतागन्तुकनानात्वं निन्द्यते ।
वि० पु० २।१४।३२ —

वेणुरन्ध्रविभेदेन भेदः षड्जादिसञ्ज्ञितः ।
अभेदव्यापिनो वायोस्तथास्य परमात्मनः ॥ १२५ ॥

इत्यादिकं तु परमात्मविषयकमेव ।
तदेतत् सर्वमभिप्रेत्य जीवानां प्रतिक्षेत्रं भिन्नत्वं स्वपक्षत्वेन निर्दिशन्ति "अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगताः" (भा० १०।८७।३०) इति ।
अत्र यदिशब्दात् पूर्वपाठेन अपरिमितत्वं ध्रुवत्वं चासन्दिग्धमिति । तत्र स्वपक्षत्वं पश्चात्पाठेन सर्वगतत्वं तु सन्दिग्धमिति । तत्र परपक्षत्वं स्पष्टमेव । अत एव "एको देवः सर्वभूतेषु गूढः" (श्वे० ६।११) इत्यादिकं परमात्मपरं वाक्यं जीवानामनेकत्वं बोधयति ॥ श्रुतयः ॥

३३ । प्रतिक्षेत्रभिन्नत्वे हेत्वन्तरम् "अणुः" इति । अणुः परमाणुरित्यर्थः । परमाणुश्च यस्य दिग्भेदेऽप्यंशो न कल्पयितुं शक्यते स एवांशस्य परा काष्ठेति तद्विदः । अणोरप्यखण्डदे-

हचेतयितृत्वं प्रभावविशेषरूपाद् गुणादेव भवति । यथा शिरआदौ धार्यमाणस्य जतुजटितस्यापि महौषधिखण्डस्याखण्डदेहपुष्टीकरणादिहेतुः प्रभावः । यथा वायस्कान्तादेर्लोहचालनादिहेतुः प्रभाव एव तद्वत् ।
तदेतदणुत्वमाह "सूक्ष्माणामप्यहं जीवः" (भा० ११।१६।११) इति ।
तस्मात् सूक्ष्मतापराकाष्ठाप्राप्तो जीव इत्यर्थः । दुर्ज्ञेयत्वाद् यत् सूक्ष्मत्वं तदत्र न विवक्षितम् "महतां च महानहं सूक्ष्माणामप्यहं जीवः" (भा० ११।१६।११) इति परस्परप्रतियोगित्वेन वाक्यद्वयस्यानन्तर्योक्तौ स्वारस्यभङ्गात् । प्रपञ्चमध्ये हि सर्वकारणत्वान् महत्तत्त्वस्य महत्त्वं नाम व्यापकत्वं न तु पृथिव्याद्यपेक्षया सुज्ञेयत्वं यथा तद्वत् प्रपञ्चे जीवानामपि सूक्ष्मत्वं परमाणुत्वमेवेति स्वारस्यम् ।
श्रुतयश्च "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" (मु० ३।१।९) इति । "बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः" (श्वे० ५।९) इति । "आराग्रमात्रो ह्यपरोऽपि दृष्टः" (श्वे० ५।८) इति च ॥ श्रीभगवान् ॥

३४ । तथा (भा० १०।८७।३०) —

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास
तर्हि न शास्यतेति नियमो ध्रुव नेतरथा ।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्
सममनुजानतां यदमतं मतदुष्टतया ॥ १२६ ॥

अयमर्थः — परमात्मनोऽंशत्वं तस्माज् जायमानत्वं च जीवस्य श्रूयते । तत्र "ममैवांशो जीवलोके" (गीता १५।७) इत्यादिसिद्धेऽंशत्वे तावत् तस्य विभुत्वमयुक्तमित्याहुः — अपरिमिता वस्तुत एवानन्तसङ्ख्या नित्याश्च ये तनुभृतो जीवास्ते यदि सर्वगता विभवः स्युस्तर्हि तेषां व्याप्यत्वाभावेन समत्वात् शास्यतेति नियमो न स्यात् । ईश्वरो नियन्ता जीवो नियम्य इति वेदकृतनियमो न घटत इत्यर्थः ।
हे ध्रुव ! इतरथा जीवस्याणुत्वेन व्याप्यत्वभावे तु सति न तन्नियम इति न । अपि तु स घटत एवेत्यर्थः । अथ "यतो वा इमानि भूतानि जायन्ते" (तै० ३।१) इति जायमानत्वावस्थायामपि व्याप्यव्यापकत्वेनैव नियम्यनियन्तृत्वं भवति ।
सर्वत्रैव कार्यकारणयोस्तथाभावदर्शनादित्याहुः — अजनीति । यन्मयं यदुपादानकं यदजनि जातं जायत इत्यर्थः । तदुपादानं कर्तृ तस्य जायमानस्य यन् नियन्तृ भवेत् तदविमुच्य किञ्चिदप्यमुक्त्वा व्याप्यैवेत्यर्थः । किं च यदुपादानरूपं परमात्माख्यं तत्त्वं केनाप्यपरेण समं समानमित्यनुजानतां यः कश्चित् तथा वदति । तत्रानुज्ञामपि ददताममतं ज्ञातं न भवतीत्यर्थः । तत्र हेतुः — मतदुष्टतया तस्य मतस्याशुद्धत्वेन ।
तत्राशुद्धत्वं श्रुत्या च विरोधात् । श्रुतिश्च "असमो वा एष परो न हि कश्चिदेव दृश्यते सर्वे त्वेते न वा जायन्ते च म्रियते सर्वे ह्यपूर्णाश्च भवन्ति" इति चतुर्वेदशिखायाम् । "न तत्समश्चाभ्यधिकश्च दृश्यते" (श्वे० ६।८) इति । "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च" इति

चान्यत्र । “बृहत्वाद् बृंहणत्वाच्च यद् ब्रह्म परमं विदुः” (वि० पु० १।१२।५७) इति श्रीविष्णुपुराणे ।
अतः परमात्मन एव सर्वव्यापकत्वम् “एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा” (श्वे० ६।११) इत्यादौ । तस्मादणुरेव जीव इति । यत् तु श्रीभगवद्गीतासु “नित्यः सर्वगतः स्थाणुः” (गीता २।२४) इत्यादिना जीवनिरूपणं तत्र सर्वगतः श्रीभगवानेव तत्स्थस्तदाश्रितश्चासावणुश्च इति सर्वगतः स्थाणुर्जीवः प्रोक्तः ॥ श्रुतयः ॥

३५ । अथ शुद्धस्वरूपत्वान् नित्यनिर्मलत्वमुदाहृतमेव “शुद्धो विचष्टे ह्यविशुद्धकर्तुः” (भा० ५।११।१२) इत्यनेन ।
तथा तेनैव शुद्धस्यापि ज्ञातृत्वमप्युदाहृतम् । ज्ञानं च नित्यस्य स्वाभाविकधर्मत्वान् नित्यम् । अत एव न विक्रियात्मकमपि ।
तथा चैतन्यसम्बन्धेन देहादेः कर्तृत्वदर्शनात् । क्वचिदचेतनस्य कर्तृत्वं च “न ऋते तत् क्रियते किञ्चनारे” इत्यादावन्तर्यामिचैतन्यसम्बन्धेन भवतीत्यङ्गीकाराच्च शुद्धादेव कर्तृत्वं प्रवर्तते । तदुक्तम् “देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु” (भा० ६।१६।२४) इति ।
तत् तूपाधिप्राधान्येन प्रवर्तमानमुपाधिधर्मत्वेन व्यपदिश्यते । यथा “कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः” (भा० ३।२६।८) इत्यादौ । परमात्मप्राधान्येन प्रवर्तमानं तु निरुपाधिकमेवेत्याह (भा० ११।२५।२६) —

सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः ।
तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ १२७ ॥

स्पष्टम् ॥ श्रीभगवान् ॥

३६ । अथ भोक्तृत्वं संवेदनरूपत्वेन यथा तथा तत्रैव चिद्रूपे पर्यवस्यतीत्याह “भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्” (भा० ३।२६।८) इति ।
“कारणं विदुः” इति पूर्वेणैवान्वयः ॥ श्रीकपिलदेवः ॥

३७ । अथ परमात्मैकशेषत्वस्वभावश्चेति व्याख्येयम् । एकः परमात्मनोऽन्यः शेषोऽंशः । स चासौ स च एकशेषः । परमात्मन एकशेषः परमात्मैकशेषः । तस्य भावस्तत्त्वम् । तदेव स्वभावः प्रकृतिर्यस्य स परमात्मैकशेषत्वस्वभावः । तथाभूतश्चायं सर्वदा मोक्षदशायामपीत्यर्थः । एतादृशत्वं चास्य स्वतः स्वरूपत एव न तु परिच्छेदादिना ।
तदीयस्वाभाविकाचिन्त्यशक्त्या स्वाभाविकतदीयरश्मिपरमाणुस्थानीयत्वादौपाधिकावस्थायां त्वंशेन प्रकृतिशेषत्वमपि भवती इति च स्वत इत्यस्य भावः ।
शक्तिरूपत्वं चास्य तटस्थशक्त्यात्मकत्वात् तथा तदीयरश्मिस्थानीयत्वेऽपि नित्यतदाश्रयित्वात् तद्व्यतिरेकेण व्यतिरेकात् “हेतुर्जीवोऽस्य सर्गादेः” (भा० १२।७।१८) इत्यनुसारेण जगत्सृष्टौ तत्साधनत्वाद् द्रव्यरूपत्वेऽपि प्रधानसाम्याच् चावगम्यते ।
उक्तं च प्रकृतिविशेषत्वेन तस्य शक्तित्वम् (वि० पु० ६।७।६१, ६३) —

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा ।
अविद्याकर्मसञ्ज्ञाख्या तृतीया शक्तिरुच्यते ॥ १२८ ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥ १२९ ॥

इति च विष्णुपुराणे । "भूमिरापोऽनलो वायुः" (गीता ७।४) इत्यादौ । "भिन्ना प्रकृतिरष्टधा" इत्यनन्तरम् । गीता ७।५—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ १३० ॥
इति श्रीगीतोपनिषत्सु च ।

"विष्णुशक्तिः परा प्रोक्ता" (वि० पु० ६।७।६१) इत्यादि विष्णुपुराणवचने तु तिसृणामेव पृथक् शक्तित्वनिर्देशात् क्षेत्रज्ञस्याविद्याकर्मसम्बन्धेनैव शक्तित्वमिति परास्तं किन्तु स्वरूपेनैवेत्यायातम् ।
तथा च श्रीभगवद्गीतायाम् "ममैवांशः" (गीता १५।७) इति । अत एव "अपरेयमितस्त्वन्याम्" (गीता ७।५) इत्युक्तम् ।
"क्षेत्रज्ञ एता मनसो विभूतीः" (भा० ५।११।१२) इत्यादौ क्षेत्रज्ञशब्दश्च शुद्धेऽपि प्रवर्तते क्षेत्रशब्दस्योपलक्षणमात्रत्वात् ।
तदेवं शक्तित्वेऽप्यन्यत्वमस्य तटस्थत्वात् । तटस्थत्वं च मायाशक्त्यतीतत्वात् । अस्याविद्यापराभवादिरूपेण दोषेण परमात्मनो लेपाभावाच् चोभयकोटावप्रवेशात् । तस्य तच्छक्तित्वे सत्यपि परमात्मनस्तल्लेपाभावश्च यथा क्वचिदेकदेशस्थे रश्मौ छायया तिरस्कृतेऽपि सूर्यस्यातिरस्कारस्तद्वत् । उक्तं च तटस्थत्वं श्रीनारदपञ्चरात्रे—

यत् तटस्थं तु चिद्रूपं स्वसंवेद्याद् विनिर्गतम् ।
रञ्जितं गुणरागेण स जीव इति कथ्यते ॥ १३१ ॥ इत्यादौ ।

अतो विष्णुपुराणेऽप्यन्तराल एव पठितोऽसौ । अन्यत्वं च श्रुतौ "अस्मान् मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः" (श्वे० ४।९) "तयोरन्यः पिप्पलं स्वाद्वत्ति" (मु० ३।१।१) इत्यादौ ।
अत एवोक्तं वैष्णवे (वि० पु० ६।७।९४)—

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ १३२ ॥ इति ।

देवत्वमनुष्यत्वादिलक्षणो विशेषतो यो भेदस्तस्य जनकेऽप्यज्ञाने नाशं गते ब्रह्मणः परमात्मनः सकाशादात्मनो जीवस्य यो भेदः स्वाभाविकस्तं भेदमसन्तं कः करिष्यति ? अपि तु सन्तं विद्यमानमेव सर्व एव करिष्यतीत्यर्थः ।

उत्तरत्र पाठेनासन्तमित्येतस्य विधेयत्वादन्यार्थः कष्टसृष्ट एवेति मोक्षदायामपि तदंशत्वाव्यभिचारः स्वाभाविकशक्तित्वादेव । अत एवाविद्याविमोक्षपूर्वकस्वरूपावस्थितिलक्षणायां मुक्तौ तल्लीनस्य तत्साधर्म्यापत्तिर्भवति "निरञ्जनः परमं साम्यमुपैति" (मु० ३।१।३) इत्यादिश्रुतिभ्यः । गीता १४।२ —

> इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
> स्वर्गेऽपि नोपजायते प्रलये न व्यथन्ति च ॥ १३३ ॥

इति श्रीगीतोपनिषद्भ्यश्च । अत एव "ब्रह्म वेद ब्रह्मैव भवति" (मु० ३।२।९) इत्यादिषु च ब्रह्मतादात्म्यमेव बोधयति । स्वेनाचिन्तनीयज्ञानं भवति । तत्स्वाभाव्यापत्तिः "उपपत्तेः" (ब्र० सू० ३।१।२३) इतिवत् ।

तदेवं शक्तित्वे सिद्धे शक्तिशक्तिमतोः परस्परानुप्रवेशात् । शक्तिमद्व्यतिरेके शक्तिव्यतिरेकात् । चित्त्वाविशेषाच्च क्वचिदभेदनिर्देशः । एकस्मिन्नपि वस्तुनि शक्तिवैविध्यदर्शनाद् भेदनिर्देशश्च नासमञ्जसः ।

श्रीरामानुजीयास्तु अधिष्ठानाधिष्ठात्रोरपि जीवेशयोरभेदव्यपदेशो व्यक्तिजात्योर्गवादिव्यपदेशवदिति मन्यन्ते । यथा श्रीविष्णुपुराणे (वि० पु० १।९।६९) —

> योऽयं तवागतो देव समीपं देवतागणः ।
> स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥ १३४ ॥ इति ।

श्रीगीतासु च "सर्वं समाप्नोषि ततोऽसि सर्वः" (गीता ११।४०) इति । तत्र ज्ञानेच्छून् प्रति शास्त्रमभेदमुपदिशति भक्तीच्छून् प्रति तु भेदमेव ।

क्वचित् तु परमात्मप्रतिबिम्बत्वं यदस्य श्रूयते । यथा (भा० ४।२८।६३) —

> यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ।
> द्विधाभूतमवेक्षेत तथैवान्तरमावयोः ॥ १३५ ॥ इति ।

तदपि ज्ञानेच्छून् प्रत्यभेददृष्टिपोषणार्थमेवोच्यते न वास्तववृत्त्यैव प्रतिबिम्बत्वेन । अद्वयवादगुरुमतेऽपि "अम्बुवदग्रहणात्" (ब्र० सू० ३।२।१९) इति न्यायविरोधात् ।

"वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" (ब्र० सू० ३।२।२०) इति न्यायेन यथाकथञ्चित् प्रतिबिम्बसादृश्यमात्राङ्गीकाराच्च ।

तदेतत् तस्य परमात्मांशरूपताया नित्यत्वं श्रीगीतोपनिषद्भिरपि दर्शितम् "ममैवांशो जीवलोके जीवभूतः सनातनः" (गीता १५।६) इति ।

तदेवमंशत्वं तावदाह तत्र समष्टेः (भा० ३।६।८) —

> एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ।
> आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ १३६ ॥

टीका च — अशेषसत्त्वानाम् प्राणिनामात्मा व्यष्टीनां तदंशत्वात् । अंशो जीवः । अवतारोक्तिस्तस्मिन् नारायणाविर्भावाभिप्रायेण । इत्येषा ॥ श्रीशुकः ॥

३८ । अथ व्यष्टेः (भा० ११।११।४) —

एकस्यैव ममांशस्य जीवस्यैव महामते ।
बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः ॥ १३७ ॥

इतरो मोक्षः । अत्र रश्मिपरमाणुस्थानीयो व्यष्टिः । तत्र सर्वाभिमानी कश्चित् समष्टिरिति ज्ञेयम् ॥ श्रीभगवान् ॥

३९ । तत्र शक्तित्वेनैवांशत्वं व्यञ्जयन्ति "स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोऽंशकृतम्" (भा० १०।८७।२०) इति ।
अबहिरन्तरसंवरणं बहिर्बहिरङ्गाणि कार्याणि अन्तः अन्तरङ्गानि कारणानि तैरसंवरणं कार्यकारणैरसंस्पृष्टम् । अंशकृतमंशमित्यर्थः । अखिलशक्तिधृतः सर्वशक्तिधरस्येति विशेषणम् ।
जीवशक्तिविशिष्टस्यैव तव जीवोऽंशः न तु शुद्धस्येति गमयित्वा जीवस्य तच्छक्तिरूपत्वेनैवांशत्वमित्येतद् व्यञ्जयन्ति ।
अथ तटस्थत्वं च "स यदजया त्वजामनुशयीत" (भा० १०।८७।३८) इत्यादौ व्यक्तमस्ति । उभयकोटावप्रविष्टत्वादेव ॥ श्रुतयः श्रीभगवन्तम् ॥

४० । अथ ज्ञानेच्छुं प्रति जीवेशयोरभेदमाह (भा० ४।२८।६२) —

अहं भवान् न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥ १३८ ॥

स्पष्टं ॥ श्रीपरमात्मा पुरञ्जनम् ॥

४१ । तत्र पूर्वोक्तरीत्या प्रथमं तावत् सर्वेषामेव तत्त्वानां परस्परानुप्रवेशविवक्षयैक्यं प्रतीयते इत्येवं शक्तिमति परमात्मनि जीवाख्यशक्त्यनुप्रवेशविवक्षैव तयोरैक्यपक्षे हेतुरित्यभिप्रैति श्रीभगवान् (भा० ११।२२।७) —

परस्परानुप्रवेशात् तत्त्वानां पुरुषर्षभ ।
पौर्वापर्यप्रसङ्ख्यानं यथा वक्तुर्विवक्षितम् ॥ १३९ ॥

टीका च — अन्योन्यस्मिन्ननुप्रवेशाद् वक्तुर्यथा विवक्षितं तथा पूर्वा अल्पसङ्ख्या अपरा अधिकसङ्ख्या तयोर्भावः पौर्वापर्यं तेन प्रसङ्ख्यानं गणनम् । इत्येषा ॥ श्रीभगवान् ॥

४२ । अथाव्यतिरेकेण चिद्रूपत्वाविशेषेणापि तयोरैक्यमुपदिशति (भा० ११।२२।११) —

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ।
तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ॥ १४० ॥ इति ।

टीका च—कथं तर्हि पञ्चविंशतिपक्षः ? तत्राह "पुरुष" इति । वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात् । अतस्तयोरत्यन्तमन्यत्वकल्पनापार्था । इत्येषा ।
अत्र सदृशत्वानन्यत्वाभ्यां तयोः शक्तिशक्तिमत्त्वं च दर्शितम् । तेनाव्यतिरेकोऽपि ॥ श्री-भगवान् ॥

४३ । अथ भक्तीच्छुं प्रति तयोर्भेदमुपदिशति (भा० ३।९।३३)—

यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः ।
स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ॥ १४१ ॥

भूतादिभिर्विरहितमात्मानं जीवं स्वरूपेण तस्या जीवशक्तेराश्रयभूतेन शक्तिमता मयोपेतं युक्तम् । स्वाराज्यं साष्टर्यादिकम् ॥ श्रीगर्भोदशायी ब्रह्माणम् ॥

४४ । तत्र भेदे हेतुमाह (भा० ११।२२।१०)—

अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ।
स्वतो न सम्भवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥ १४२ ॥

टीका च—स्वतो न सम्भवति । अन्यतस्तु सम्भवात् । स्वतः सर्वज्ञः परमेश्वरोऽन्यो भवेदिति षड्विंशतितत्त्वपक्षाभिप्रायः । इत्येषा ।
ज्ञानदत्वमत्र ज्ञानाज् ज्ञातुश्च वैलक्षण्यमीश्वरस्य बोधयत्येवेति भावः । एवम् "त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः" (भा० ११।२२।२८) इत्युद्धववाक्यं चाग्रे ।
अत्र यदि जीवाज्ञानकल्पितमेव तस्य परमेश्वरत्वं स्यात् तर्हि स्थाणुपुरुषवत् तस्य ज्ञान-दत्वमपि न स्यादित्यतः सत्य एव जीवेश्वरभेद इत्येवं श्रीमदीश्वरेणैव स्वयं स्वस्य पारम-र्थिकेश्वराभिमानित्वेनैवास्तित्वं मूढान् प्रति बोधितमिति स्पष्टम् ।
भेदवादिनश्चात्रैव प्रकरणे "यथा विविक्तं यद् वक्त्रं गृह्णीमो युक्तिसम्भवात्" (भा० ११।२२।९) इत्यत्र परमविवेकजस्तु भेद एवेति ।
तथा "मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम्" (भा० ११।२२।४) इत्यत्र । तथापि भगवच्छक्त्यैव तत्र तत्र नानावादावकाश इति च मन्यते ।
ननु (भा० ११।१९।१७)—

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ।
प्रमाणेष्वनवस्थानाद् विकल्पात् स विरज्यते ॥ १४३ ॥

इत्यत्र भेदमात्रं निषिध्यते विकल्पशब्दस्य संशयार्थत्वात् । संशयं परित्यज्य वस्तुन्येव निष्ठाम् करोतीत्यर्थः ।
अत एव (भा० ११।१९।१८) —

कर्मणां परिणामित्वादाविरिञ्च्यादमङ्गलम् ।
विपश्चिन् नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १४४ ॥

इत्यत्रास्योत्तरश्लोकेऽपि विरिञ्च्यमेवावधिं कृत्वा नश्वरत्वदृष्टिरुक्ता न तु वैकुण्ठादिकमपीति ॥ श्रीभगवान् ॥

४५ । अन्यत्रापि श्रीजामातृमुनिभिरुपदिष्टस्य जीवलक्षणस्यैवोपजीव्यत्वेन तं लक्षयति त्रिभिः (भा० ३।२५।१६-१८) —

अहं ममाभिमानोत्थैः कामलोभादिभिर्मलैः ।
वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥ १४५ ॥
तदा पुरुष आत्मानं केवलं प्रकृतेः परम् ।
निरन्तरं स्वयञ्ज्योतिरणिमानमखण्डितम् ॥ १४६ ॥
ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना ।
परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ॥ १४७ ॥

स्पष्टैव योजना । तत्राहमिति पद्येन स आत्मा नित्यनिर्मल इति । आत्मानमित्यनेनैवाहमर्थ इति । अन्यथा ह्यात्मत्वप्रतीत्यभावः स्यात् । केवलमित्यनेन एकरूपस्वरूपभागिति । प्रकृतेः परमित्यनेन विकाररहित इति ।
भक्तियुक्तेनेत्यनेन परमात्मप्रसादाधीनतत्प्रकाशत्वात् । निरन्तरमित्यनेन नित्यत्वात् परमात्मैकशेषत्वमिति । स्वयञ्ज्योतिरित्यनेन स्वस्मै स्वयम्प्रकाश इति । "ज्ञानमात्रात्मको न च" इति च । अणिमानमित्यनेनाणुरेवेति प्रतिक्षेत्रं भिन्न इति च । अखण्डितमित्यनेनाविच्छिन्नज्ञानादिशक्तित्वात् । ज्ञातृत्वकर्तृत्वभोक्तृत्वनिजधर्मक इति व्यञ्जितम् ॥ श्रीकपिलदेवः ॥

४६ । तथेदमपि प्राक्तनलक्षणाविरुद्धम् (भा० ७।७।१९-२०) —

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग् हेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ १४८ ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ।
अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ १४९ ॥

अव्ययोऽपक्षयशून्यः । एकः न तु देहेन्द्रियादिसङ्घातरूपः । क्षेत्रज्ञो ज्ञातृत्वादिधर्मकः । इन्द्रियादीनामाश्रयः । स्वाभाविकज्ञातृत्वादेवाविक्रियः ।

स्वदृक् स्वस्मै स्वयम्प्रकाशः । हेतुः सर्गादिनिमित्तम् । तदुक्तं श्रीसूतेन "हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः" (भा० १२।७।१८) इति । व्यापको व्याप्तिशीलः । असङ्गी अनावृतश्च स्वतःप्रकाशरूपत्वात् ।
"अहम्ममेत्यसद्भावं देहादौ मोहजं त्यजेत्" इति देहाद्यधिकरणकस्य मोहजस्यैव त्यागो न तु स्वरूपभूतस्येत्यहमर्थ इति व्यज्यते ।
तदेवं जीवस्तदंशत्वात् सूक्ष्मज्योतीरूप इत्येके । तथैव हि कौस्तुभांशत्वेन व्यञ्जितम् । तथा च स्कान्दप्रभासखण्डे जीवनिरूपणे —

न तस्य रूपं वर्णा वा प्रमाणं दृश्यते क्वचित् ।
न शक्यं कथितुं वापि सूक्ष्मश्चानन्तविग्रहः ॥ १५० ॥
बालाग्रशतभागस्य शतधा कल्पितस्य च ।
तस्मात् सूक्ष्मतरो देवः स चानन्त्याय कल्प्यते ॥ १५१ ॥
आदित्यवर्णं सूक्ष्माभमब्बिन्दुमिव पुष्करे ।
नक्षत्रमिव पश्यन्ति योगिनो ज्ञानचक्षुषा ॥ १५२ ॥
इति ॥ श्रीप्रह्लादोऽसुरबालकान् ॥

४७ । तदेवमनन्ता एव जीवाख्यास्तटस्थाः शक्तयः । तत्र तासां वर्गद्वयम् । एको वर्गोऽनादित एव भगवदुन्मुखः । अन्यस्त्वनादित एव भगवत्पराङ्मुखः — स्वभावतस्तदीयज्ञानभावात् तदीयज्ञानाभावाच्च ।
तत्र प्रथमोऽन्तरङ्गाशक्तिविलासानुगृहीतो नित्यभगवत्परिकररूपो गरुडादिकः । यथोक्तं पाद्मोत्तरखण्डे "त्रिपाद्विभूतेर्लोकास्तु" इत्यादौ भगवत्सन्दर्भोदाहृते ।
अस्य च तटस्थत्वं जीवत्वप्रसिद्धेरीश्वरत्वकोटावप्रवेशात् ।
अपरस्तु तत्पराङ्मुखत्वदोषेण लब्धच्छिद्रया मायया परिभूतः संसारी । यथोक्तं हंसगुह्यस्तवे "सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे" (भा० ६।४।२५) इति ।
एकादशे च "भयं द्वितीयाभिनिवेशतः स्यात्" (भा० ११।२।३७) इति ।
यथोक्तं च वैष्णवे (वि० पु० ६।७।६३) —

तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥ १५३ ॥ इति ।

तद्वर्गद्वयमेवोक्तं श्रीविदुरेणापि (भा० ३।७।३७) —

तत्त्वानां भगवंस्तेषां कतिधा प्रतिसङ्क्रमः ।
तत्रेमं क उपासीरन् क उ स्विदनुशेरते ॥ १५४ ॥

इत्यनेन । तत्र परमेश्वरपराङ्मुखानां शुद्धानामपि तच्छक्तिविशिष्टात् परमेश्वरात् सोपाधिकं जन्म भवति । तच्च जन्म निजोपाधिजन्मना निजजन्माभिमानहेतुकाध्यात्मिकावस्थात्व-प्राप्तिरेव ।
तदेतदाहुः (भा० १०।८७।३१) —

न घटत उद्भवः प्रकृतिपुरुषयोरजयोर
उभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् ।
त्वयि न इमे ततो विविधनामगुणैः परमे
सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ १५५ ॥

प्रकृतेस्त्रैगुण्यम् । पुरुषः शुद्धो जीवस्तयोर्द्वयोरप्यजत्वादुद्भवो न घटते । ये चासुभृत आध्यात्मिकरूपाः सोपाधयो जीवा जायन्ते तत्तदुभयशक्तियुजा परमात्मनैव कारणेन जायन्ते ।
प्रकृतिविकारप्रलयेण सुप्तवासनत्वात् शुद्धास्ताः परमात्मनि लीना जीवाख्याः शक्तयः सृष्टिकाले विकारिणीं प्रकृतिमासृज्य क्षुभितवासनाः सत्यः सोपाधिकावस्थां प्राप्नुवन्त्य एव व्युच्चरन्तीत्यर्थः ।
एतदभिप्रेत्यैव “भगवानेक आसेदम्” (भा० ३।५।२३) इत्यादि तृतीयस्कन्धप्रकरणे (भा० ३।५।२६) —

कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ।
पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥ १५६ ॥

इत्यनेन वीर्यशब्दोक्तस्य जीवस्य प्रकृतावाधानमुक्तम् । एवं श्रीगीतोपनिषत्स्वपि “मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्” (गीता १४।३) इत्यत्रोक्तम् ।
टीकाकारैश्च ब्रह्मशब्देन प्रकृतिर्व्याख्याता गर्भशब्देन जीव इति ।
पुनरेष एव तृतीये (भा० ३।२६।१९) —

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।
आधत्त वीर्यं सासूत महत् तत्त्वं हिरण्मयम् ॥ १५७ ॥

इत्यत्र वीर्यं चिच्छक्तिमिति टीकायां व्याख्यातमतः शक्तित्वमप्यस्य टीकासम्मतम् । ततोऽकस्मादुद्भवमात्रांशे दृष्टान्तः — जलबुद्बुदवदिति ।
अतः पुनरपि प्रलयसमये त इमे सोपाधिका जीवास्त्वयि बिम्बस्थानीयमूलचिद्रूपे रश्मि-स्थानीयचिदेकलक्षणशुद्धजीवशक्तिमये । तत एव “स्वमपीतो भवति” (छा० ६।८।१) इत्यादि श्रुतौ स्वशब्दाभिधेये परमे परमात्मनि विविधनामगुणैर्विविधाभिर्देवादिसञ्ज्ञा-भिर्विविधैः शुभाशुभगुणैश्च सह लिल्युर्लीयन्ते ।

पूर्ववत् प्रलयेऽपि दृष्टान्तः "सरित इवार्णव" इति । "अशेषरसा इव मधुनि" इति च । अत्र देवमनुष्यादिनामरूपपरित्यागेन तस्मिन् लीनेऽपि स्वरूपभेदोऽस्त्येव तत्तदंशसद्भावादित्यभिप्रायः ।
अत्र श्रुतयः "हन्तेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" इति (छा० ६।३।२) ।
श्वे० ४।५ —

> अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
> अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ १५८ ॥ इति ।

मु० ३।२।८ —

> यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
> तथा विद्वान् नामरूपाद् विमुक्तः परात् परं पुरुषमुपैति दिव्यम् ॥ १५९ ॥ इति ।

छा० ६।९।१-२ —

> यथा सौम्येमा मधु मधुकृतो निस्तिष्ठन्ति
> नानारूपाणां वृक्षाणां रसान् समवहारमेकतां रसं गमयन्ति ॥ १६० ॥
> ते यथा तत्र विवेकं न लभन्तेऽमुष्याहं
> वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीति ।
> एवमेव खलु सौम्येमाः सर्वाः प्रजाः सति
> सम्पद्य न विदुः सति सम्पद्यामहे ॥ १६१ ॥
> श्रुतयः श्रीभगवन्तम् ॥

४८ । तदेवं परमात्मनस्तटस्थाख्या शक्तिर्विवृता । अन्तरङ्गाख्या तु पूर्ववदेव ज्ञेया । अथ बहिरङ्गाख्या विव्रियते (भा० ११।३।१६) —

> एषा माया भगवतः सृष्टिस्थित्यन्तकारिणी ।
> त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ॥ १६२ ॥

भगवतः स्वरूपभूतैश्वर्यादेः परमात्मन । एषा तटस्थलक्षणेन पूर्वोक्ता जगत्सृष्ट्यादिकारिणी मायाख्या शक्तिः । त्रयो वर्णा गुणा यस्याः सा । तथा चाथर्वणिकाः पठन्ति "सितासिता च कृष्णा च सर्वकामदुघा विभोः" इति । उक्तं च "दैवी ह्येषा गुणमयी मम माया दुरत्यया" (गीता ७।१४) इत्यत्र गुणमयीति ॥ अन्तरीक्षो विदेहम् ॥

४९-५२ । तस्या मायायाश्चांशद्वयम् । तत्र गुणरूपस्य मायाख्यस्य निमित्तांशस्य द्रव्यरूपस्य प्रधानाख्यस्योपादानांशस्य च परस्परं भेदमाह चतुर्भिः (भा० ११।२४।१) —

अथ ते सम्प्रवक्ष्यामि साङ्ख्यं पूर्वविनिश्चितम् ।
यद् विज्ञाय पुमान् सद्यो जह्याद् वैकल्पिकं भ्रमम् ॥ १६३ ॥

टीका च — अद्वितीयात् परमात्मनो मायया प्रकृतिपुरुषद्वारा सर्वं द्वैतमुदेति पुनस्तत्रैव लीयते इत्यनुसन्दधानस्य पुरुषस्य द्वन्द्वभ्रमो निवर्तते इति वक्तुं साङ्ख्यं प्रस्तौति "अथ" इति । इत्येषा । अत्र प्रधानपर्यायः प्रकृतिशब्दः ॥

भा० ११।२४।२ —

आसीज् ज्ञानमथो अर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगे युगे ॥ १६४ ॥

टीका च — अथोशब्दः कार्त्स्न्ये । ज्ञानं द्रष्टृ । तेन दृश्यरूपः कृत्स्नोऽप्यर्थश्च विकल्पशून्यमेकमेव ब्रह्मण्येव लीनमासीदित्यर्थः । इत्येषा ।
तृतीयस्कन्धे च "भगवानेक आसेदमग्र आत्मात्मनां विभुः" (भा० ३।५।२३) इत्यादौ यद् भगवत्त्वेन शब्द्यते तदेवात्र ब्रह्मत्वेन शब्द्यते इति । "वदन्ति" (भा० १।२।११) इत्यादिवदुभयत्रैकमेव वस्तु प्रतिपाद्यम् । अन्ते तु "एष साङ्ख्यविधिः प्रोक्तः" इत्यादौ । "परावरदृशा मया" (भा० ११।२४।२९) इत्यन्तेन भगवद्रूपेणाप्यवस्थितिः स्पष्टैव ।
कदा ? इत्यपेक्षायामाह — यदा आदौ कृतयुगे विवेकनिपुणा जना भवन्ति तस्मिन्नयुगे तत्पूर्वस्मिन् प्रलयसमय इत्यर्थः ॥

भा० ११।२४।३ —

तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोऽगोचरं सत्यं द्विधा समभवद् बृहत् ॥ १६५ ॥

टीका च — तद् बृहद् ब्रह्म वाङ्मनोगोचरं यथा भवति । तथा माया दृश्यं फलं तत्प्रकाशः । तद्रूपेण मायारूपेण विलासरूपेण वा द्विधाभूत् । इत्येषा ।
अत्र माया दृश्यमिति । फलं तत्प्रकाश इति छेदः । तेन ब्रह्मणा यद् दृश्यं वस्तु तन् माया तस्य ब्रह्मणो यः प्रकाशविशेषः स फलमित्यर्थः ॥
भा० ११।२४।४ —

तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ॥ १६६ ॥

टीका च — तयोर्द्विधाभूतयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी । इत्येषा ।

एवं श्रीविष्णुपुराणे "विष्णोः स्वरूपात् परतो हि तेऽन्ये रूपे प्रधानं पुरुषश्च विप्र" (वि० पु० १।२।२४) इत्यत्र तेषामेव टीका च — परतो निरुपाधेर्विष्णोः स्वरूपात् ते प्रागुक्ते प्रधानं पुरुषश्च इति द्वे रूपे अन्ये मायाकृते । इति ॥ श्रीभगवान् ॥

५३ । अन्यत्र तयोरुपादाननिमित्तरूपयोरंशयोर्वृत्तिभेदेन भेदानप्याह (भा० १०।६३।२६) —

कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्सङ्घातो बीजरोहप्रवाहस्तन्मायैषा तन् निषेधं प्रपद्ये ॥ १६७ ॥

टीका च — कालः क्षोभकः । कर्म निमित्तम् । तदेव फलाभिमुखमभिव्यक्तं दैवम् । स्वभावस्तत्संस्कारः । जीवस्तद्वान् । द्रव्यं भूतसूक्ष्माणि । क्षेत्रं प्रकृतिः । प्राणः सूत्रम् । आत्मा अहङ्कारः ।
विकार एकादशेन्द्रियाणि महाभूतानि चेति षोडशकः । तत्सङ्घातो देहः । तस्य च बीजरोहवत् प्रवाहः । रोहोऽङ्कुरः । देहाद् बीजरूपं कर्म । ततोऽङ्कुररूपो देहः । ततः पुनरेवमिति प्रवाहः । तत् त्वां निषेधावधिभूतं प्रपद्ये भजे इति । इत्येषा ।
अत्र कालदैवकर्मस्वभावा निमित्तांशाः । अन्ये उपादानांशास्तद्वान् जीवस्तूभयात्मकस्तथोपादानवर्गे निमित्तशक्त्यंशोऽप्यनुवर्तते । यथा जीवोपाधिलक्षणेऽहमाख्ये तत्त्वे तदीयाहम्भावः । स ह्यविद्यापरिणाम इत्यादि । यथोक्तं तृतीयस्य षष्ठे (भा० ३।६।२५) —

आत्मानं चास्य निर्भिन्नमभिमानोऽविशत् पदम् ।
कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते ॥ १६८ ॥ इति ।

अत्र "आत्मानमहङ्कारमभिमानो रुद्रः कर्मणा अहंवृत्त्या" इति टीका च ।
अत्र च यन् निर्भिन्नं तदधिष्ठानं वागादीन्द्रियं तृतीयान्तमध्यात्ममिति प्रकरणनिर्णयष्टीकायामेव कृतोऽस्ति ।
कर्मणो बीजरूपत्वं कारणतामात्रविवक्षया । तदेवमत्रापि मूलमायायाः सर्वोपादानांशमूलभूतं क्षेत्रशब्दोक्तं प्रधानमप्यंशरूपमित्यधिगतम् । जीवस्तद्वानित्यनेन शुद्धजीवस्य मायातीतत्वं बोधयति ॥ ज्वरः श्रीभगवन्तम् ॥

५४ । अथ निमित्तरूपांशस्य प्रथमे द्वे वृत्ती आह (भा० ११।११।३) —

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ॥ १६९ ॥

टीका च — तन्येते बन्धमोक्षावावाभ्यामिति तनू शक्ती मे मायया विनिर्मिते । मायावृत्तिरूपत्वात् । मोक्षबन्धकरी इत्येकवचनं द्विवचनार्थे ।

ननु तत्कार्यत्वे बन्धमोक्षयोरनादित्वनित्यत्वे न स्याताम् ? तत्राहाद्ये अनादी । ततो यावदविद्यां प्रेरयामि तावद् बन्धः । यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः । इत्येषा । अत्र मायावृत्तिरूपत्वादिति वस्तुतो मायावृत्ती एव ते । विनिर्मितत्वं त्वपरानन्तवृत्तिकया तया प्रकाशमानत्वादेवोच्यते । यतोऽनादी इत्यर्थः । तथा स्फुरतीत्यस्य मोक्ष इत्यनेनैवान्वयः । जीवस्य स्वतो मुक्तत्वमेव । बन्धस्त्वविद्यामात्रेण प्रतीतः । विद्योदये तु तत् प्रकाशते मात्रम् । ततो नित्य एव मोक्ष इति भावः ।

न च वाच्यम् "एषा माया" (भा० ११।३।१६) इत्यादौ सामान्यलक्षणे मोक्षप्रदत्वं तस्या नोक्तमित्यसम्यक्त्वमिति । अन्तकारित्वेनात्यन्तिकप्रलयरूपस्य मोक्षस्याप्युपलक्षितत्वात् ।

अत्र विद्याख्या वृत्तिरियं स्वरूपशक्तिवृत्तिविशेषविद्याप्रकाशे द्वारमेव न तु स्वयमेव सेति ज्ञेयम् ।

अथाविद्याख्यस्य भागस्य द्वे वृत्ती — आवरणात्मिका विक्षेपात्मिका च । तत्र पूर्वा जीव एव तिष्ठन्ती तदीयं स्वाभाविकं ज्ञानमावृण्वाना । उत्तरा च तं तदन्यथाज्ञानेन सञ्जयन्ती वर्तत इति ॥ श्रीभगवान् ॥

५५ । अत्र निमित्तांशस्त्वेवं विवेचनीयः । यथा निमित्तांशरूपया मायाख्ययैव प्रसिद्धा शक्तिस्त्रिधा दृश्यते ज्ञानेच्छाक्रियारूपत्वेन । तत्र तस्याः परमेश्वरज्ञानरूपत्वं यथा तृतीये (भा० ३।५।२५) —

> सा वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिका ।
> माया नाम महाभाग ययेदं निर्ममे विभुः ॥ १७० ॥

इत्यस्य टीकायाम — सा वै द्रष्टृदृश्यानुसन्धानरूपा । सद् दृश्यम् । असददृश्यम् । आत्मा स्वरूपम् । सदसतोरात्मा यस्यास्तदुभयानुसन्धानरूपत्वात् । इति ।

तदिच्छारूपत्वं यथा तत्रैव "आत्मेच्छानुगतावात्मा" (भा० ३।५।२३) इत्यस्य टीकायाम् "आत्मेच्छा माया तस्या अनुगतौ लये सति" इति ।

तत्क्रियारूपत्वं चैकादशे "एषा माया भगवतः" (भा० ११।३।१६) इत्युदाहृतवचने एव द्रष्टव्यम् ।

यद्यपि परमेश्वरस्य साक्षाज् ज्ञानादिकं न माया किन्तु स्वरूपशक्तिरेव तथापि तज्ज्ञानादिकं प्राकृते कार्ये न तदर्थं प्रवर्तते किन्तु भक्तार्थमेव प्रवर्तमानमनुषङ्गेनैव प्रवर्तत इत्यग्रे विवेचनीयत्वात् तत् प्रवृत्त्याभाससंवलितं यन् मायावृत्तिरूपं ज्ञानादिकमन्यत् तदेव तज्ज्ञानादिशब्देनोच्यते ।

तथाभूतं च तज्ज्ञानादिकं द्विविधम — स्वभावसिद्धत्वात् केवलपरमेश्वरनिष्ठं तद्दत्तत्वात् जीवनिष्ठं च । तत्र प्रथमं द्रष्टृदृश्यानुसन्धानसिसृक्षाकालादिरूपं द्वितीयं विद्याविद्याभोगेच्छाकर्मादिरूपमिति ।

अथोपादानांशस्य प्रधानस्य लक्षणम् (भा० ३।२६।१०) —

यत् तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १७१ ॥

यत् खलु त्रिगुणं सत्त्वादिगुणत्रयसमाहारस्तदेव अव्यक्तं प्रधानं प्रकृतिं च प्राहुः । तत्राव्यक्तसञ्ज्ञत्वे हेतुः — अविशेषं गुणत्रयसाम्यरूपत्वादनभिव्यक्तविशेषम् । अत एवाव्याकृतसञ्ज्ञं चेति गमितम् ।
प्रधानसञ्ज्ञत्वे हेतुः — विशेषवत् स्वांशकार्यरूपाणां महदादिविशेषाणामाश्रयरूपतया तेभ्यः श्रेष्ठम् । प्रकृतिसञ्ज्ञत्वे हेतुः — सदसदात्मकं सदसत्सु कार्यकारणरूपेषु महदादिषु कारणत्वादनुगत आत्मा स्वरूपं यस्य तत् ।
तथा नित्यं प्रलये कारणमात्रात्मनावस्थितसर्वांशत्वेन सृष्टिस्थित्योश्चापञ्चीकृतांशत्वेनाविकृतं स्वरूपं यस्य तादृशमिति ब्रह्मत्वं महदादिरूपत्वं च व्यावृत्तं ब्रह्मणो निर्गुणत्वात् महदादीनां चाव्यक्तापेक्षया कार्यरूपत्वात् । एवं च श्रीविष्णुपुराणे (वि० पु० १।२।१९-२१) —

अव्यक्तं कारणं यत् तत् प्रधानमृषिसत्तमैः ।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ॥ १७२ ॥
अक्षय्यं नान्यदाधारममेयमजरं ध्रुवम् ।
शब्दस्पर्शविहीनं तद् रूपादिभिरसंहितम् ॥ १७३ ॥
त्रिगुणं तज् जगद्योनिरनादिप्रभवाप्ययम् ।
तेनाग्रे सर्वमेवासीद् व्याप्तं वै प्रलयादनु ॥ १७४ ॥ इत्यादि ।

इदमेव प्रधानमनादेर्जगतः सूक्ष्मावस्थारूपमव्याकृताव्यक्ताद्यभिधं वेदान्तिभिरपि परमेश्वराधीनतया मन्यते "तदधीनत्वादर्थवत्" (ब्र० सू० १।४।३) इत्यादिन्यायेषु । निषिध्यते तु साङ्ख्यवत् स्वतन्त्रतया "आनुमानिकमप्येकेषामिति चेन् न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" (ब्र० सू० १।४।१) इत्यादिन्यायेषु श्वेताश्वतरोपनिषदि प्रधानशब्दश्च ।
श्रूयते "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारबन्धस्थितिमोक्षहेतुः" (श्वे० ६।१६) इत्यादौ ॥ श्रीकपिलदेवः ॥

५६ । तदेवं सन्दर्भद्वये शक्तित्रयविवृतिः कृता । तत्र नामाभिन्नताजनितभ्रान्तिहानाय सङ्ग्रहश्लोकाः —

माया स्यादन्तरङ्गा या बहिरङ्गा च सा स्मृता ।
प्रधानेऽपि क्वचिद् दृष्टा तद्वृत्तिर्मोहिनी च सा ॥ १७५ ॥
आद्ये त्रये स्यात् प्रकृतिश्चिच्छक्तिस्त्वन्तरङ्गिका ।
शुद्धजीवेऽपि ते दृष्टे तथेशज्ञानवीर्ययोः ॥ १७६ ॥
चिन्मायाशक्तिवृत्त्योस्तु विद्याशक्तिरुदीर्यते ।
चिच्छक्तिवृत्तौ मायायां योगमाया समा स्मृता ॥ १७७ ॥

प्रधानाव्याकृताव्यक्तं त्रैगुण्ये प्रकृतौ परम् ।
न मायायां न चिच्छक्तावित्याद्यूह्यं विवेकिभिः ॥ १७८ ॥ इति ।

अथ मायाकार्यं जगल्लक्ष्यते (भा० ३।२६।५१-५२) —

ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् ।
उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥ १७९ ॥
एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ।
तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ।
यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ १८० ॥

तेनेश्वरेणानुविद्धेभ्यः क्षुभितेभ्यो महदादिभ्योऽण्डमचेतनमुत्थितम् । यस्मादण्डादसौ विराट् पुरुषस्तूदतिष्ठत् । भगवतः पुरुषस्य ॥ श्रीकपिलदेवः ॥

५७ । तदेवम् "भगवतो रूपम्" इत्युक्तेस्तस्यापि प्राग्वदप्राकृतत्वमापतति । तन्निषेधायाह (भा० २।१०।३५) —

अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ।
उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥ १८१ ॥

अमुनी अमू उपासनार्थं भगवत्यारोपिते जगदात्मके स्थूलसूक्ष्माख्ये विराट् हिरण्यगर्भा-परपर्याये व्यष्टिसमष्टिशरीरे ये मया तुभ्यमनुवर्णिते ते उभे अपि विपश्चितो न गृह्णन्ति वस्तुतया नोपासते किं तर्हि तदीयबहिरङ्गाधिष्ठानतयैवेत्यर्थः । तदुक्तं वैष्णवे (वि० पु० १।४।३९) —

यदेतद् दृश्यते मूर्तमेतज् ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥ १८२ ॥ इति ।

एतन् मूर्तं जगद् भ्रान्तिज्ञानेन एव तव रूपं जानन्तीत्यर्थः ।
श्रुतिश्च "नेदं यदिदमुपासते" (केन० १।४) इति । "यदिदं जगदुपासते प्राणिनो नेदं ब्रह्म" इति श्रीरामानुजभाष्यम् ।
अत एव न गृह्णन्तीत्यत्र हेतुर्मायासृष्टे न तु स्वरूपशक्तिप्रादुर्भाविते । अनेन चतुर्भुजादि-लक्षणस्य साक्षाद्रूपस्य मायातीतत्वमपि व्यक्तम् ।
अत्रास्य जगतो मायामयस्य पुरुषरूपत्वे पुरुषगुणावताराणां विष्ण्वादीनां सत्त्वादिमया-स्तदंशरूपाणीति ज्ञेयम् ।
तान्यपेक्ष्य चोक्तं मार्कण्डेये —

विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥ १८३ ॥ इति ।

शरीरशब्दस्य तत्तन्निजशरीरवाचित्वे तु तद्ग्रहणात् पूर्वं विष्ण्वादिभेदासम्भवात् तन्निर्देशानुपपत्तेः ॥ श्रीशुकः ॥

५८ । पूर्वम् "मायासृष्टे" इत्युक्तम् । तत्र मायाशब्दस्य नाज्ञानार्थत्वम् । तद्वादे हि सर्वमेव जीवादिद्वैतमज्ञानेनैव स्वस्वरूपे ब्रह्मणि कल्प्यत इति मतम् ।
निरहङ्कारस्य केनचिद्धर्मान्तरेणापि रहितस्य सर्वविलक्षणस्य चिन्मात्रस्य ब्रह्मणस्तु नाज्ञानाश्रयत्वं न चाज्ञानविषयत्वं न च भ्रमहेतुत्वं सम्भवतीति ।
परमालौकिकवस्तुत्वादचिन्त्यशक्तित्वं तु सम्भवेत् । यत् खलु चिन्तामण्यादावपि दृश्यते यया शक्त्या त्रिदोषघ्नौषधिवत् परस्परविरोधिनामपि गुणानां धारिण्या तस्य निरवयवत्वादिके सत्यपि सावयवत्वादिकमङ्गीकृतम् ।
तत्र शब्दश्चास्ति प्रमाणम् "विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशः स्युः" इत्यादिकं श्वेताश्वतरोपनिषदादौ । "आत्मेश्वरोऽतर्क्यसहस्रशक्तिः" (भा० ३।३३।३) इत्यादिकं श्रीभागवतादिषु । तथा च ब्रह्मसूत्रम् "आत्मनि चैवं विचित्राश्च हि" (ब्र० सू० २।१।२८) इति ।
तत्र द्वैतान्यथानुपपत्त्यापि ब्रह्मण्यज्ञानादिकं कल्पयितुं न शक्यतेऽसम्भवादेव । ब्रह्मण्यचिन्त्यशक्तिसद्भावस्य युक्तिलब्धत्वात् श्रुतत्वाच्च द्वैतान्यथानुपपत्तिश्च दूरे गता ।
ततश्चाचिन्त्यशक्तिरेव द्वैतोपपत्तीकारणं पर्यवसीयते । तस्मान् निर्विकारादिस्वभावेन सतोऽपि परमात्मनोऽचिन्त्यशक्त्या विश्वाकारत्वादिना परिणामादिकं भवति चिन्तामण्ययस्कान्तादीनां सर्वार्थप्रसवलोहचालनादिवत् । तदेतदङ्गीकृतं श्रीबादरायणेन "श्रुतेस्तु शब्दमूलत्वात्" (ब्र० सू० २।१।२७) इति ।
ततस्तस्य तादृशशक्तित्वात् प्राकृतवन् मायाशब्दस्येन्द्रजालविद्यावाचित्वमपि न युक्तं किन्तु मीयते विचित्रं निर्मीयतेऽनयेति विचित्रार्थकरशक्तिवाचित्वमेव । तस्मात् परमात्मपरिणाम एव शास्त्रसिद्धान्तः । तदेतच्च भगवत्सन्दर्भे विवृतमस्ति ।
तत्र चापरिणतस्यैव सतोऽचिन्त्यया तया शक्त्या परिणाम इत्यसौ सन्मात्रतावभासमानस्वरूपव्यूहरूपद्रव्याख्यशक्तिरूपेणैव परिणमते न तु स्वरूपेणेति गम्यते । यथैव चिन्तामणिः । अतस्तन्मूलत्वान् न परमात्मोपादानतासम्प्रतिपत्तिभङ्गः । तदुक्तमेकादशे श्रीभगवता (भा० ११।२४।१९) —

प्रकृतिर्यस्योपादानमाधारः पुरुषः परः ।
सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ १८४ ॥ इति ।

अत एव क्वचिदस्य ब्रह्मोपादानत्वं क्वचित् प्रधानोपादानत्वं श्रूयते । तत्र सा मायाख्या परिणामशक्तिश्च द्विविधा वर्ण्यते — निमित्तांशो माया । उपादानांशः प्रधानमिति । तत्र

केवला शक्तिर्निमित्तं त्वद् व्यूहमयी तूपादानमिति विवेकः । अत एव श्रुतावपि “विज्ञानं चाविज्ञानं च” (तै० २।६।२) इति कस्यचिद् भागस्याचेतनता श्रूयते ।

अथ मूलप्रमाणे श्रीभागवतेऽपि तृतीयादौ मुख्य एव सृष्टिप्रस्तावे च ज्ञानवैराग्याङ्गत्वेन च पुराणान्तरगतिसामान्यसेवितः प्रधानपरिणाम एव स्फुटमुपलभ्यते ।

क्व च स्तुत्यादौ ज्ञानवैराग्याङ्गतयैव विवर्तोऽपि यः श्रूयते सोऽपि जगतो नान्यथासिद्धतापरः किन्तु परमात्मव्यूहप्रधानपरिणामेन सिद्धस्यैव तस्य समष्टिव्यष्टिरूपस्य यथायथं शुद्धे परमात्मनि तदंशरूपात्मनि वात्मात्मीयताध्यारोपितापरः ।

तत्र परमात्मनि विराडुपासनावाक्यादिश्रवणं हेतुरात्मनि तु तत्तदावेशो हेतुरिति विवेचनीयम् ।

अन्यत्र सिद्धस्य वस्तुन एवान्यत्रारोपो यथा शुक्तौ रजतस्य । एतदेव मिथ्याखपुष्पादेरारोपासम्भवात् पूर्वपूर्वविवर्तमात्रसिद्धानादिपरम्परात्वे दृष्टान्ताभावाच्च ।

किं च पूर्वं खलु वारिदर्शनाद् वार्याकारा मनोवृत्तिर्जातापि तदप्रसङ्गसमये सुप्ता तिष्ठति तत्तुल्यवस्तुदर्शनेन तु जागर्ति तद्विशेषानुसन्धानं विना तदभेदेन स्वतन्त्रतामारोपयति । तस्मान् न वारि मिथ्या न वा स्मरणमयी तदाकारा वृत्तिर्न वा तत्तुल्यं मरीचिकादि वस्तु किन्तु तदभेदेनारोप एवायथार्थत्वान् मिथ्या ।

स्वप्ने च “मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्” (ब्र० सू० ३।२।३) इति न्यायेन जाग्रद्दृष्टवस्त्वाकारायां मनोवृत्तौ परमात्ममाया तद्वस्त्वभेदमारोपयतीति पूर्ववत् ।

तस्माद् वस्तुतस्तु न क्वचिदपि मिथ्यात्वम् । ततः शुद्ध आत्मनि परमात्मनि वा तादृशतदारोप एव मिथ्या न तु विश्वं मिथ्येति ।

ततो जगतः परमात्मजातत्वेन साक्षात्तदात्मत्वाभावाद् बहिरङ्गशक्तिमयत्वेन च वैकुण्ठादिवत् साक्षात्तदात्मीयत्वाभावादबुधानामेव तत्र शुद्धे तत्तद्बुद्धिः ।

यद्यपि शुद्धाश्रयमेव जगत् तथापि जगता तत्संसर्गोऽपि नास्ति । तदुक्तम् “असक्तं सर्वभृच् चैव” (गीता १३।१४) इति गीतासु । तथा देहगेहादावात्मात्मीयताज्ञानं तेषामेव स्यादित्युभयत्रैवारोपः शास्त्रे श्रूयते । यथा “यदेतद् दृश्यते मूर्तम्” (वि० पु० १।४।३९) इत्यादिकं विष्णुपुराणे ।

यथा वा (भा० १०।१४।२७) —

> त्वामात्मानं परं मत्वा परमात्मानमेव च ।
> आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताज्ञता ॥ १८५ ॥ इति ।

त्वामात्मानं सर्वेषां मूलरूपं परमितरं तद्विपरीतं मत्वा तथा परमितरं जीवमेव च मूलरूपात्मानं परं मत्वा साङ्ख्यविद इव तस्य तथा मन्यमानस्य पुनः स जीवात्मा बहिर्मृग्यो भवति । तस्य तेनैव हेतुना लब्धच्छिद्रया मायया देहात्मबुद्धिः कार्यत इत्यर्थः । अहो अज्ञजनताया अज्ञता क्रमाज् ज्ञानभ्रंश इत्यर्थः ।

तदुक्तं हंसगुह्यस्तवे (भा० ६।४।२५) —

देहोऽसवोऽक्षा मनवो भूतमात्रामात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ १८६ ॥ इति ।

तथा श्रीभगवदुद्धवसंवादे (भा० ११।२२।३३) —

आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ।
व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ १८७ ॥ इति ।

किं च विवर्तस्य ज्ञानादिप्रकरणपठितत्वेन गौणत्वात् परिणामस्य तु स्वप्रकरणपठितत्वेन मुख्यत्वात् । ज्ञानाद्युभयप्रकरणपठितत्वेन सन्दंशन्यायसिद्धप्राबल्याच्च परिणाम एव श्रीभागवततात्पर्यमिति गम्यते ।
तच्च भगवदचिन्त्यैश्वर्यज्ञानार्थं मिथ्यात्वाभिधानं तु नश्वरत्वाभिधानवत् विश्वस्य परमात्मबहिर्मुखत्वापादकत्वाद्धेयताज्ञानमात्रार्थं न तु वस्त्वेव तन् न भवतीति जीवेशस्वरूपैक्यज्ञानमात्रार्थम् "वैधर्म्याच्च न स्वप्नादिवत्" (ब्र० सू० २।२।२९) इति न्यायेन ।
तथा च नारदीये —

जगद् विलापयामासुरित्युच्येताथ तत्स्मृतेः ।
न च तत्स्मृतिमात्रेण लयो भवति निश्चितम् ॥ १८८ ॥ इति ।

तत्र मुख्य एव सृष्टिप्रस्तावे प्रधानपरिणाममाह (भा० ३।५।२६-२७) —

कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ।
पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥ १८९ ॥
ततोऽभवन् महत्तत्त्वमव्यक्तात् कालचोदितात् ।
विज्ञानात्मात्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः ॥ १९० ॥ इत्यादि ।

"भगवानेक आसेदम्" (भा० ३।५।२३) इति प्राक्तनानन्तरग्रन्थादधोक्षजो भगवान् पुरुषेण प्रकृतिद्रष्ट्रात्मभूतेन स्वांशेन द्वारभूतेन कालो वृत्तिर्यस्यास्तया मायया निमित्तभूतया गुणमय्यां मायायामव्यक्ते वीर्यं जीवाख्यमाधत्त "हन्तेमास्तिस्रो देवता" इत्यादिश्रुतेः । विज्ञानात्मैव महत्तत्त्वम् । तमोनुदः प्रलयगताज्ञानध्वंसकर्ता ॥ श्रीमैत्रेयः ॥

५९ । ज्ञानाद्यङ्गत्वेऽप्याह (भा० ११।९।१६-२१) —

एको नारायणो देवः पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वरः ।
एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ॥ १९१ ॥
कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ।

सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ १९२ ॥
परावराणां परम आस्ते कैवल्यसञ्ज्ञितः ।
केवलानुभवानन्दसन्दोहो निरुपाधिकः ॥ १९३ ॥
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ।
सङ्क्षोभयन् सृजत्यादौ तया सूत्रमरिन्दम ॥ १९४ ॥
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन् प्रोतमिदं विश्वं येन संसरते पुमान् ॥ १९५ ॥
यथोर्णनाभिर्हृदयादूर्णां सन्तत्य वक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ १९६ ॥

कालः कला यस्यास्तया स्वाधीनया मायया ।
श्रुतिश्च (मु० १।१।७) —

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम् ॥ १९७ ॥
इति ॥ श्रीदत्तात्रेयो यदुम् ॥

६० । तदेवं सूक्ष्मचिदचिद्वस्तुरूपशुद्धजीवाव्यक्तशक्तेः परमात्मनः स्थूलचेतनाचेतनवस्तुरूपाण्याध्यात्मिकजीवादिपृथिव्यन्तानि जायन्त इत्युक्तम् ।
ततः केवलस्य परमात्मनो निमित्तत्वं शक्तिविशिष्टस्योपादानत्वमित्युभयरूपतामेव मन्यन्ते । "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्" (ब्र० सू० १।४।२३) इत्यादौ । तदेवं तस्य सदा शुद्धत्वमेव ।
तत्र शक्तेः शक्तिमदव्यतिरेकादनन्यत्वमुक्तम् । तथा सत्कार्यवादाङ्गीकारे स्वान्तःस्थितस्वधर्मविशेषाभिव्यक्तिलब्धविकाशेन कारणस्यैवांशेन कार्यत्वमित्येवम् । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा० ६।१।४) इत्यादिश्रुतिसिद्धं कार्यस्य कारणादनन्यत्वं कारणस्य तु कार्यादन्यत्वमित्यायाति ।
तदेवं जगत्कारणशक्तिविशिष्टात् परमात्मनोऽनन्यदेवेदं जगतस्त्वसावन्य एवेत्याह (भा० १।५।२०) —

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः ।
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥ १९८ ॥

इदं विश्वं भगवानिव भगवतोऽनन्यदित्यर्थः । तस्मादितरस्तटस्थाख्यो जीवश्च स इवेति पूर्ववत् । अत एव "ऐतदात्म्यमिदं सर्वम्" (छा० ६।८।७) इति । "सर्वं खल्विदं ब्रह्म" (छा० ३।१४।१) इति श्रुती ।

यतो भगवतः । भवतो भवन्तं प्रति प्रादेशमात्रं किञ्चिन्मात्रं दर्शितमित्यर्थः ॥ श्रीनारदः श्रीव्यासम् ॥

६१ । स्पष्टमेवाह (भा० २।७।५०) —

सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः ।
समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥ १९९ ॥

सोऽयं ते समासेन सङ्क्षेपेण अभिहितः । कथम् ? तटस्थलक्षणेनैवेत्याह — सत् कार्यं स्थूलमशुद्धजीवजगदाख्यं चेतनाचेतनं वस्तु । असत — कारणं सूक्ष्मं शुद्धजीवप्रधानाख्यं चिदचिद्वस्तु च यत् तत् सर्वं हरेरन्यन् न भवति सूक्ष्मस्य तच्छक्तिरूपत्वात् स्थूलस्य तत्कार्यरूपत्वादिति भावः ।
इदमेव श्रीहंसदेवेनोक्तम् "अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा" (भा० ११।१३।२४) इति ।
जगतस्तदनन्यत्वेऽपि शुद्धस्य तस्य तद्दोषसाङ्कर्यं नास्तीत्याह — अन्यस्मादिति ॥ श्रीब्रह्मा श्रीनारदम् ॥

६२ । तत्रानन्यत्वे युक्तिं विवृणोति पञ्चभिः (भा० ७।१५।५७) —

आदावन्ते जनानां सद् बहिरन्तः परावरम् ।
ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयम् ॥ २०० ॥

जनानां देहादीनामादौ कारणत्वेनान्ते चावधित्वेन यत् परमात्मलक्षणं सर्वकारणं वस्तु सद्वर्तमानं तदेव स्वयं बहिर्भोग्यमन्तर्भोक्तृ परावरं चोच्चनीचं तमोऽप्रकाशः । ज्योतिः प्रकाशश्च स्फुरति नान्यत् । अन्यस्य तद्विना स्वतः स्फुरणानिरूप्यत्वादिति भावः ॥

६३ । ननु कथं तर्हि तस्मादत्यन्तपृथगिवार्थजातं प्रतीयते ? तत्राह (भा० ७।१५।५८) —

आबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ २०१ ॥

आबाधितस्तर्कविरोधेन सर्वतो बाधितः स्वातन्त्र्यसत्तायाः सकाशान् निरस्तोऽपि यथा आभासः सूर्यादिप्रतिरश्मिर्बालादिभिः पृथक् प्रकाशमानतादर्शनाद् वस्तुतया स्वतन्त्रपदार्थतया स्मृतः कल्पितः । तद्वदैन्द्रियकं सर्वं मूढैः स्वतन्त्रार्थत्वेन विविधं कल्पितं तत् तु न तत्त्वदृष्ट्या स्वातन्त्र्यनिरूपणस्य दुर्घटत्वादित्यर्थः ॥

६४ । तदेवाह द्वाभ्याम् (भा० ७।१५।५९) —

क्षित्यादीनामिहार्थानां छाया न कतमापि हि ।
न सङ्घातो विकारोऽपि न पृथङ् नान्वितो मृषा ॥ २०२ ॥

क्षित्यादीनां पञ्चभूतानां छायैक्यबुद्ध्यालम्बनरूपं देहादि सङ्घातारम्भपरिणामानां मध्ये कतमाप्यन्यतमापि न भवति ।
न तावत् तेषां सङ्घातो वृक्षाणामिव वनमेकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः । न ह्येकस्मिन् वृक्ष आकृष्टे सर्वं वनमाकृष्यते ।
न च विकार आरब्धोऽवयवी । अपिशब्दात् परिणामोऽपि । कुतः ? स किमवयवेभ्यः पृथगारभ्यते परिणमते च तदन्वितो वा ।
न तावदत्यन्तं पृथक् तथा अप्रतीतेः । न चान्वितः । स किं प्रत्यवयवं सर्वोऽप्यन्वेत्यंशेन वा ?
आद्ये अङ्गुलिमात्रेऽपि देहबुद्धिः स्याद् द्वितीये तस्याप्यंशाङ्गीकारे सत्यनवस्थापातः स्यात् । अतो देहादेः स्वातन्त्र्येणावस्थितिर्मृषैवेति ॥

६५ । एवं देहादेः स्वातन्त्र्येणानिरूप्यत्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि तथैवानिरूप्यत्वमाह (भा० ७।१५।६०) —

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यसन्नवयवोऽन्ततः ॥ २०३ ॥

धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः । अवयवित्वात् । तेषामपि तर्ह्यवयव एव स्वतन्त्र इति चेत् ? तत्राह — उक्तप्रकारेण अवयविनि निरूपयितुमसति अवयवोऽप्यन्ततो निरूपयितुमसन्निव स्यात् । अवयविप्रतीत्यन्यथानुपपत्तिं विना परमाणुलक्षणावयवसद्भावे प्रमाणाभावादित्यर्थः । तदुक्तं पञ्चमे "एवं निरुक्तं क्षितिशब्दवृत्तम्" (भा० ५।१२।९) इत्यादि ।
तस्मादैक्यबुद्ध्यालम्बनरूपं यत् प्रतीयते तत् सर्वत्र परमात्मलक्षणं सर्वकारणं वस्त्वेवेति साधूक्तम् "आदावन्ते जनानां सत्" (भा० ७।१५।५७) इत्यादिना । एवमेव तृतीयेऽप्युक्तम् (भा० ३।६।१-३) —

इति तासां स्वशक्तीनां सतीनामसमेत्य सः ।
प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ २०४ ॥
कालसञ्ज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥ २०५ ॥
सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ।
भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ २०६ ॥ इति ।

अत एव "यस्य पृथिवी शरीरम्" (सुबाल ७।१, बृहद् ३।७।३) इत्यादिश्रुतौ सर्वस्य परमात्मशरीरत्वेन प्रसिद्धिः परमात्मनस्तु शरीरित्वेन । तदेवमवयवरूपेण प्रधानपरिणामः सर्वत्रावयवी तु परमात्मवस्त्वेवेति सिद्धम् । ततोऽप्यमिथ्यात्वमेव जगत उपपद्येत ॥

६६ । ननु यदि परमात्मवस्त्वेव सर्वत्रावयवी देहः स्यात् ततश्च तत्रैव ब्राह्मणत्वादिसञ्ज्ञाप्राप्तेर्गुणदोषहेतुविधिनिषेधावपि स्यातां तौ च न सम्भवतः । तस्मादन्य एवावयवी युज्यते इत्याशङ्क्याह (भा० ७।१५।६१) —

स्यात् सादृश्यभ्रमस्तावद् विकल्पे सति वस्तुनः ।
जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ २०७ ॥

वस्तुनः परमात्मनो विकल्पे संशये सतीति तस्य तादृशत्वेन निर्णयो यावन् न स्यादित्यर्थः । तावदेव तस्मात् सर्वैक्यबुद्धिनिदानात् पृथग्देहैक्यबुद्धिः सादृश्यभ्रमः स्यात् । पूर्वापरावयवानुसन्धाने सति परस्परमासज्यैकत्र स्थितत्वेनावयवत्वसाधारण्येन चैक्यसादृश्यात् प्रत्यवयवमेकतया प्रतीतेः सोऽयं देह इति भ्रम एव भवतीत्यर्थः । प्रतिवृक्षं तदिदं वनमितिवत् ।
यथोक्तं स्वयं भगवता (भा० ११।२२।४४) —

सोऽयं दीपोऽर्चिषां यद्वत् स्रोतसां तदिदं जलम् ।
सोऽयं पुमानिति नृणां मृषा धीर्गीर्मृषायुषाम् ॥ २०८ ॥ इति ।

ततश्च तत्रैव ब्राह्मणत्वाद्यभिमाने सति स्वप्नविषयकौ जाग्रत्स्वप्नाविव तद्विषयकौ विधिनिषेधौ स्यातामित्याह — जाग्रदिति । तथा तेन प्रकारेण विधेर्विधिता निषेधस्य निषेधतेत्यर्थः । एवम् (भा० ११।२८।१) —

परस्वभावकर्माणि न प्रशंसेन् न गर्हयेत् ।
विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥ २०९ ॥

इत्यादिरेकादशाष्टविंशतितमाध्यायेऽपि ज्ञेयः ।
तत्र च "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्" (भा० ११।२८।४) इत्यादिकं स्यात् सादृश्यभ्रमस्तावदित्याद्यनुसारेणैव व्याख्येयम् । अवस्तु यद् द्वैतं तस्येत्यर्थः ।
तस्मात् स्वातन्त्र्येण निरूपणाशक्त्या परमात्मनोऽनन्यदेव सर्वमिति प्रकरणार्थः ॥ श्रीनारदः श्रीयुधिष्ठिरम् ॥

६७ । अत आह (भा० ७।९।४८) —

त्वं वायुरग्निरवनिर्वियदम्बु मात्राः
प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।

सर्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ २१० ॥

हृदयमन्तरिन्द्रियं मनोबुद्ध्यहङ्कारचित्तात्मकम् । चित् शुद्धो जीवः । अनुग्रहः स्वसम्मुखीकरणशक्तिः । किं बहुना सगुणो मायिकः । विगुणश्चामायिकः सर्वार्थस्त्वमेवेति ॥ श्रीप्रह्लादः श्रीनृसिंहम् ॥

६८ । अथ तस्य मायाशक्तिकार्यमायाजीवेभ्योऽन्यत्वं च स्पष्टयति (भा० ३।२८।४०–४१) —

यथोल्मुकाद् विस्फुलिङ्गाद्धूमाद् वापि स्वसम्भवात् ।
अप्यात्मत्वेनाभिमताद् यथाग्निः पृथगुल्मुकात् ॥ २११ ॥
भूतेन्द्रियान्तःकरणात् प्रधानाज् जीवसञ्ज्ञितात् ।
आत्मा तथा पृथग् द्रष्टा भगवान् ब्रह्मसञ्ज्ञितः ॥ २१२ ॥

अयमर्थः — स्वसम्भवात् स्वोपादानकारणादुल्मुकात् काष्ठमुष्ट्युपाधिकादग्रेर्हेतोर्यो विस्फुलिङ्गो यश्च धूमस्तस्मात् तस्माद् यथा तत्तदुपादानमग्निः पृथग् यथा च तस्मादप्युल्मुकात् तदुपादानमसावग्निः पृथक् ।
कीदृशादपि ? तत्त्रयादप्यात्मत्वेनाभिमतात् तापकतया धूमेऽप्यग्न्यंशसद्भावेनाग्निस्वरूपतया प्रतीतादपि ।
तथा विस्फुलिङ्गस्थानीयाज् जीवसञ्ज्ञिताज् जीवादुल्मुकस्थानीयात् प्रधानात् । प्रधानोपाधिकभगवत्तेजसो धूमस्थानीयाद् भूतादेः सर्वोपादानरूपो भगवान् पृथक् ।
य एवात्मा स्वांशेन तत्तदन्तर्यामितया परमात्मा क्वचिदधिकारिणि निर्विशेषचिन्मात्रतया स्फुरन् ब्रह्मसञ्ज्ञितश्च यत एव द्रष्टा तेषामादिमध्यान्तावस्थासाक्षीति ।
यथोल्मुकादिदानीं ज्वलतः काष्ठात् स्वसम्भवादग्नेः सम्भूतादात्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादप्यत्यन्ताविवेकिनो हि धूमेऽप्यग्न्यभिमानोऽस्तीति धूमादित्यप्युक्तम् । उल्मुकात् पूर्वसिद्धादपि तद्दाहकः प्रकाशकश्चाग्निः पृथगेव तथा भूतेन्द्रियान्तःकरणादिभ्यः परमात्मत्वेन भगवत्त्वेन ब्रह्मसञ्ज्ञितत्वेन च शब्दितो द्रष्टा तदशेषज्ञः पृथगेव तेषां बहिरङ्गतटस्थशक्तिमयत्वादित्यर्थः ॥ श्रीकपिलदेवः ॥

६९ । तत्र येषां मनः परमात्मनि नास्ति ते परमात्मात्मके जगत्यसदंशमेव गृह्णन्ति । ये तु परमात्मविदस्ते सदंशमेव गृह्णन्तीत्याहुः (भा० १०।८७।२६) —

सदिव मनस्त्रिवृत् त्वयि विभात्यसदामनुजात्
सदभिमृशन्त्यशेषमिदमात्मतयात्मविदः ।
न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया
स्वकृतमनुप्रविष्टमिदमात्मतयावसितम् ॥ २१३ ॥

त्वय्यसदवर्तमानं यन् मनस्तत् खलु त्रिवृत् त्रिगुणकार्ये जगति वर्तमानं सत् त्वयि सदिव वर्तमानमिव विभाति । दर्वीसूपरसन्यायेन स्वावगाढे जगति सतोऽपि परमात्मनो ग्रहणाभावात् न तु वर्तमानमेव विभातीत्यर्थः । अत एवासदंशस्य त्रिगुणमायामयत्वं मनोमयत्वं चोक्तम् (भा० ११।७।७) —

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥ २१४ ॥ इति ।

ये त्वात्मविदस्त्वद्धेतोरास्ते आमनुजात् सोपाधिकजीवस्वरूपमभिव्याप्य इदमशेषं जगदेव आत्मतया त्वद्रूपतया सदभिमृशन्ति तेषां सदंश एव दृष्टिर्नान्यत्रेत्यर्थः ।
तत्र दृष्टान्तः "न हि विकृतिम्" इति । तेषां कनकमात्रं मृगयमानानां कनकवणिजां हि कनकविकारे सुन्दरकुरूपाकारतायां दृष्टिर्नास्ति शुद्धकनकमात्रग्राहित्वात् । तथात्मविदामपीति भावः ।
दार्ष्टान्तिकेऽपि तदात्मत्वे हेतुत्रयमाहुः — इदं जगत् स्वेन सच्छक्तिविशिष्टेन सता उपादानरूपेण त्वया कृतं पश्चात् सिद्धेऽपि कार्ये कारणांशाव्यभिचारितयान्तर्यामितया च स्वेन त्वया प्रविष्टं पुनः प्रलयेऽप्यात्मतया सच्छक्तिविशिष्टसद्रूपतयैवावसितं चेति । एवं दृष्टान्तेऽपि विवेचनीयम् ।
तदेतत् सर्वमभिप्रेत्यैवोक्तं वैष्णवे (वि० पु० १।४।४०–४१) —

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसम्प्लवे ॥ २१५ ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥ २१६ ॥
इति ॥ श्रीश्रुतयः ॥

७० । तदेवं परिणामादिकं साधितं विवर्तश्च परिहृतः । ततो विवर्तवादिनामिव रज्जुसर्पवन् न मिथ्यात्वं किन्तु घटवन् नश्वरत्वमेव तस्य । ततो मिथ्यात्वाभावेऽपि त्रिकालाव्यभिचाराभावाज् जगतो न सत्त्वम् । विवर्तपरिणामासिद्धत्वेन तद्दोषद्वयाभाववत्येव हि वस्तुनि सत्त्वं विधीयते यथा परमात्मनि तच्छक्तौ वा ।
"सदेव सौम्येदमग्र आसीत्" (छा० ६।२।१) इत्यादौ इदं शब्दोक्तं जगत् । सूक्ष्मावस्थालक्षणतच्छक्तिब्रह्मणोर्मिथस्तादात्म्यापन्नयोः सच्छब्दवचनात् । अतः सत्कार्यवादश्च सूक्ष्मावस्थामवलम्ब्यैव प्रवर्तते ।
तदेवं स्थितेऽपि पुनराशङ्क्ते — ननु सदुपादानं जगत् कथं तद्वदनश्वरतामपि भजन् न खलु सत् स्यात् ? यदि च नश्वरं स्यात् तर्हि कथं शुक्तिरजतवदव्यभिचारित्वेन केवलविवर्त्तान्तःपाति न स्यात् ?
तदेतत् प्रश्नमुट्टङ्क्य परिहरन्ति (भा० १०।८७।३६) —

सत इदमुत्थितं सदिति चेन् ननु तर्कहतं
व्यभिचरति क्व च क्व च मृषा न तथोभययुक् ।
व्यवहृतये विकल्प इषितोऽन्धपरम्परया
भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् ॥ २१७ ॥

इदं विश्वं धर्मि सदिति साध्यो धर्मः सत उत्पन्नत्वात् यद् यत उत्पन्नं तत् खलु तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुण्डलादिकं तदात्मकं तद्वत् ।
अत्रोत्थितमेव न तु शुक्तौ रजतमिव तत्रारोपितमिति सिद्धान्तिनः स्वमतमनूदितम् । नैवेत्याहुः — ननु तर्कहतमिति । अपादाननिर्देशेन भेदप्रतीतेर्विरुद्धहेतुत्वात् ।
ननु नाभेदं साधयामः किन्तु तत उत्पन्नत्वेन कुण्डलादिवद् भेदमनूद्य प्रतिषेधामः ।
तत्राभेद एव स्यादित्याशङ्क्यानैकान्तिकत्वेन हेतुं दूषयन्ति "व्यभिचरति क्व च" इति ।
क्व च कुत्रापि कारणधर्मानुगतिर्व्यभिचरति । कार्यकारणधर्मस्य सर्वांशेनानुगतं भवतीति नियमो न विद्यत इत्यर्थः । दहनाद्युद्भवे प्रभादौ दाहकत्वादिधर्मादर्शनादिति भावः ।
वि० पु० १।२२।५३–५४ —

द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च ।
क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ॥ २१८ ॥
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् ॥ २१९ ॥

इत्याद्यनन्तरम् (वि० पु० १।२२।५५) —

एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥ २२० ॥

इत्येतदेवं व्याख्यातं श्रीस्वामिभिरेव श्रीविष्णुपुराणे "नन्वक्षरस्य परब्रह्मणस्तद्विलक्षणं क्षररूपं कथं स्यात् ? इत्याशङ्क्य दृष्टान्तेनोपपादयति — एकदेशेति । प्रादेशिकस्याग्नेर्दीपादेर्दाहकस्यापि तद्विलक्षणा ज्योत्स्ना प्रभा यथा तत्प्रकाशविस्तारस्तथा ब्रह्मणः शक्तिकृतविस्तार इदमखिलं जगत्" (वि० पु० १।२२।५४) इति ।
प्रकृतमनुसरामः ।
ननु तर्हि व्यभिचारित्वे शुक्तिरजतवदेवास्तु ।
तत्राहुः "क्व च मृषा" इति । क्व च शुक्त्यादावेव प्रातीतिकमात्रसत्ताकं रजतादिकं मृषा ।
अन्यत्र यत्र उभयं प्रतीतिमर्थक्रियाकारित्वं च युनक्ति भजते तत्र न तथा मृषेति ।
ननु कूटताम्रिकादिष्वर्थक्रियाकारितापि दृश्यते ।
इत्याशङ्क्याहुः "व्यवहृतये" इति । क्रयविक्रयादिलक्षणव्यवहारायैव विकल्पो भ्रम इष्टः । न तु तत्तत्प्रसिद्धसम्यगर्थक्रियाकारितायै । तद्दानादौ यथावत् पुण्यफलादिकं न भवतीति । तथा शुण्ठीतया प्रख्यापितं विषग्रन्थ्यादिकं क्रीत्वा शुण्ठीज्ञानेन भक्षितमपि

नारोग्यजनकं प्रत्युत मारकमेवेति । तस्मात् तत्तत्प्रसिद्धसम्यगर्थक्रियाकारितयैव जगतः सत्यत्वमङ्गीक्रियते । एकाङ्गेन सा कूटसर्पादौ भयादिरूपा त्वस्त्येवेति न तद्धेतुः ।
किं च "अन्धपरम्परया" इति — स च क्रयविक्रयादिलक्षणव्यवहारोऽपि न तु यथार्थताम्रिकस्येव तद्व्यवहारकुशलेष्वपि किन्त्वन्धपरम्परयैव । अतस्तत्र तदीयकुशलेष्वसिद्धत्वेन व्यवहारस्याभासमात्रत्वात् तस्मादन्यथा नानुमेयम् । धूमाभासे हि वह्निव्यभिचारस्यौचित्यमेवेति भावः ।
तदेवमर्थक्रियाकारित्वेनास्त्येवेतरस्य भ्रमवस्तुवैलक्षण्यात् सत्यत्वमिति विवर्तवादिनि निरस्ते पुनरनश्वरवादी प्रत्युत्तिष्ठते ।
ननु "अपाम सोमममृता अभूम । अक्षय्यं ह वै चातुर्मासयाजिनः सुकृतं भवति" (ऋग्वेद ८।४८।३) इति श्रुत्यैव कर्मफलस्य नित्यत्वप्रतिपादनान् नश्वरत्वं न घटते ?
इत्याशङ्क्याहुः "भ्रमयति" इति । हे भगवन् ! ते तव भारती उरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिभिर्वृत्तिभिः । उक्थजडान्नुक्थानि यज्ञे शस्यन्ते तत्र जडाः कर्मश्रद्धाभाराक्रान्तमन्दमतय इत्यर्थः । तान् भ्रमयति ।
अयं भावः — न हि वेदः कर्मफलं नित्यमभिप्रैति किन्तु लक्षणया प्राशस्त्यमात्रम् । अन्येषां वाक्यानां विध्येकवाक्यत्वेन विधावेव तात्पर्यात् । अन्यथा वाक्यभेदप्रसङ्गः । "तद् यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" (छा० ८।१।६) इति न्यायोपबृंहितश्रुत्यन्तरविरोधश्च ।
अतः कर्मजडानामिदं भ्रममात्रं जगत् तु सत्यमपि परिणामधर्मत्वेन नश्वरमेवेति । तदुक्तं भट्टेनैव "अथवेतिहासपुराणप्रामाण्यात् सृष्टिप्रलयावपीष्येते" इति ।
अथवा "नाभेदं साधयाम" ।
इत्यादिकमाशङ्क्य प्रसिद्धस्य सत्तात्रयस्य मिथो वैलक्षण्यात् परिहरन्ति — क्व च घटादौ अर्थक्रियाकारिण्यपि व्यभिचरति सत्तेति शेषः । वस्त्वन्तरस्यार्थक्रियाकारितायामसामर्थ्याद् देशान्तरे स्वयमविद्यमानत्वात् कालान्तरे तिरोभावित्वाच्च ।
क्व च शुक्तिरजतादौ तत्रापि तदानीमपि मृषा । अर्थक्रियाकारित्वाभावात् ।
या तूभययुगुभयत्र घटादिसत्तायां शुक्तिरजतादिसत्तायां च युग् योगो यस्याः सा सा लब्धपदा भवतीत्यर्थः । सा परमकारणसत्ता न तथा किन्तु सर्वत्रापि सर्वदापि तत्तदुपाध्यनुरूपसर्वार्थक्रियाद्यधिष्ठानरूपेत्यर्थः ।
तस्मादर्थक्रियाकारित्वेन सत्यमपि परिणतत्वेन घटवन् नश्वरमेव जगत् । न प्रतीतमात्रसत्ताकं न चानश्वरसत्ताकमिति परस्परवैलक्षण्यदर्शनात् कथमेकमन्यद् भवितुमर्हतीति भावः ।
कूटताम्रिकत्वमाशङ्क्याहुः "व्यवहृतये" इति । विकल्प्यतेऽन्यत्रारोप्यत इति विकल्पः । स्वतःसिद्धस्ताम्रिकादिरर्थः स एव व्यवहृतये इषितः ।
अयमर्थः — अत्र कूटताम्रिकेण यं व्यवहारं मन्यसे सोऽपि न तेन सिध्यति । किं तर्हि सत्यताम्रिकेणैव ? अर्थान्तरं व्यवहर्तुर्हृदि तस्यैव प्रत्यक्षत्वात् । कूटताम्रिकमत्रोपलक्षणमेव । क्वचित् तं विनापि तव गृहे ताम्रिको दत्त इति पश्चाद् दातव्य इति वा छलप्रयोगे स्मार्यमाणेनापि तेन तथा व्यवहारसिद्धेः ।

तस्माद् व्यवहाररूपाप्यर्थक्रियाकारिता तस्यैव भवतीति स सत्य एव । अन्यथा सत्यस्य ताम्रिकस्याभावे शतमप्यन्धानां न पश्यतीति न्यायेन कूटताम्रिकपरम्परयापि व्यवहारोऽपि न सिध्येदित्याहुः "अन्धपरम्परया" इति । अन्धपरम्परादोषात् स एव व्यवहृतय इषित इत्यन्वयः । यथान्धपरम्परया व्यवहारो न सिध्येत् तथा कूटताम्रिकपरम्परयापीत्यर्थः ।

इत्थमेव विज्ञानवादोऽपि निराकृतः । शङ्करशारीरकेऽपि "अनादित्वेऽप्यन्धपरम्परान्यायेनाप्रतिष्ठैवानवस्थाव्यवहारविलोपिनी स्यान् नाभिप्रायसिद्धिः" इत्युक्त्वा ।

एतदुक्तं भवति — यथेदं सुवर्णं केन क्रीतमिति प्रश्ने कश्चिदाह "अनेनान्धेन" इति । अनेन कथं परिचितम् ? इति पुनराह — तेनान्धेन परिचायितम् । तेन च कथम् ? इत्याह — केनाप्यपरेणान्धेनेत्यन्धपरम्परयापि न सिध्येद् व्यवहारः । किन्तु तत्रान्धपरम्परायां यद्येकोऽपि चक्षुष्मान् सर्वादिप्रवर्तको भवति तदैव सिध्यति ।

यथा च तत्र सर्वेष्वपि चक्षुष्मत एव व्यवहारसाधकत्वं तथा कस्मिंश्चित् ताम्रिके प्रथमं सत्ये सत्येव व्यवहारः सिध्यति । तत्र च सत्यस्यैव व्यवहारसाधकत्वं तदनुसन्धानेनैव तत्र प्रवृत्तेश्चक्षुष्मत इव प्रवर्तकत्वात् ततश्च कश्चन ताम्रिकः सत्य इति स्थिते यत्र तद्व्यवहारकुशलैः परीक्षया सत्यतावगम्यते स एव कूटताम्रिकेऽप्यारोप्यमाणः सत्यो भवेत् । तदेवमर्थक्रियाकारित्वेन तस्य सत्यत्वे तदुपलक्षितं विश्वमेव भ्रमवस्तुविलक्षणं सत्यमिति सिद्धम् ।

परमात्मन एवावयवित्वव्यवहारसाधकत्वेन साधितत्वाद् युक्तमेव तत् । तथा च भ्रमादिभिः स्तुतम् "सत्यस्य योनिम्" (भा० १०।२।२६) इति । "तत् सत्यमित्याचक्षते" (तै० २।६।१) इति श्रुतिश्च । शिष्टमन्यत् समानम् ।

एवं जगतः सत्यत्वमङ्गीकृतं तच्च नश्वरमिति । तत्र नश्वरत्वं नात्यन्तिकं किन्त्वव्यक्ततया स्थितेरदृश्यतामात्रमेव सत्कार्यतासम्प्रत्तिपत्तेः "यद् भूतं भवच्च भविष्यच् च" (बृ० ३।८।३) इत्यादि श्रुतेः ॥

७१ । अत एव शुक्तित्वे रजतत्वमिव तस्याव्यक्तरूपत्वे जगत्त्वमसन् न भवति । "पटवच् च" (ब्र० सू० २।१।२०) इति न्यायेन जगदेव हि सूक्ष्मतापन्नमव्यक्तमिति दृश्यत्वेन भ्रान्तिरजतकक्षमपि जगत् तद्विलक्षणसत्ताकं तथात्मवदपरिणतत्वाभावेन नैकावस्थसत्ताकमित्येवमर्थसिद्धये तदनन्तरमेवाहुः (भा० १०।८७।३७) —

> न यदिदमग्र आस न भविष्यदतो निधनाद्
> अनुमितमन्तरा त्वयि विभाति मृषैकरसे ।
> अत उपमीयते द्रविणजातिविकल्पपथैर्
> वितथमनोविलासमृतमित्यवयन्त्यबुधाः ॥ २२१ ॥

यद् यदि इदं विश्वमग्रे सृष्टेः पूर्वं नास नासीत् तदा न भविष्यन् नाभविष्यदेव । अडागमाभाव आर्षः । आकाशकुसुममिवेति भावः ।

श्रुतयश्चासीदेवेति वदन्ति "सदेव सौम्येदमग्र आसीत्" (छा० ६।२।१) "आत्मैवेदमग्र आसीत्" (बृ० १।४।१) इत्याद्याः ।
तदेवं सूक्ष्मतया त्वत्तादात्म्येन स्थितं कारणावस्थमिदं जगत् विस्तृततया कार्यावस्थं भवति । अतो यन् निधनान् नाशमात्राद्धेतोः शुक्तौ रजतमिव त्वयि तदिदमन्तरा सृष्टि-मध्य एव न त्वग्रे चान्ते च विभाति इत्यनुमितं तन्मृषा इति प्रमाणसिद्धं न भवतीत्यर्थः ।
तत्र हेतुमाहुः "एकरसे" इति । अनुभवान्तराविषयानन्दस्वाद इति । यस्मिन्ननुभूते सति विषयान्तरस्फूर्तिर्न सम्भवति तस्मिंस्त्वयि शुक्त्यादिनिकृष्टवस्तुनीव विषयारोपः कथं स्यादित्यर्थः । "दधति सकृन् मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसार-हरावस्थान्" (भा० १०।८७।३५) इत्यस्माकमेवोक्तेः ।
अतोऽचिन्त्यशक्त्या स्वरूपादच्युतस्यैव तव परिणामस्वीकारेण द्रविणजातीनां द्रव्यमा-त्राणां मृल्लोहादीनां विकल्पा भेदा घटकुण्डलादयस्तेषां पन्थानो मार्गाः प्रकारास्तैरेवा-स्माभिरुपमीयते न तु कुत्रापि भ्रमरजतादिभिः ।
यस्मादेवं तस्माद् वितथा मनोविलासा यत्र तादृशमेव ऋतं तद्रूपं ब्रह्मैवेदं जगदित्यबुधा एव अवयन्ति मन्यन्ते । तस्य तदधिष्ठानत्वासम्भवादिति भावः । ऋतशब्दप्रयोगस्त्वत्र मिथ्यासम्बन्धराहित्यव्यञ्जनार्थमेव कृत इति ज्ञेयम् ।
अत्र सत्कार्यवादिनामयमभिप्रायः—मृत्पिण्डादिकारकैर्यो घट उत्पद्यते स सन्नसन्वा । आद्ये पिष्टपेषणम् । द्वितीये क्रियाया कारकैश्च तत्सम्बन्धस्य खपुष्पधारणवदसम्भवात् तेन च तेषामन्यथात्वात् कथं तत्सिद्धिरिति दिक् ।
तस्मान् न प्रकटमेव सन् न चात्यन्तमसत् किन्त्वव्यक्ततया मृत्पिण्डे एव स्थितोऽसौ यथा कारकतन्निष्पन्नक्रियायोगेन व्यज्यते तथा परमकारणे त्वयि स्थितं विश्वं त्वत्स्वाभाविक-शक्तितन्निष्पन्नक्रियायोगेनेति ।
अत्र स्ववेदान्तित्वप्रख्यापकानामप्यन्यथामननं वेदान्तविरुद्धमेव । मन एव भूतकार्य-मिति हि तत्र प्रसिद्धं युक्तिविरुद्धं च मनोऽहङ्कारादीनां मनःकल्पितत्वासम्भवात् । तथा हि सति वेदविरुद्धोऽनीश्वरवादश्च प्रसज्येत ।
स च निन्दितः पाद्मे—

> श्रुतयः स्मृतयश्चैव युक्तयश्चेश्वरं परम् ।
> वदन्ति तद्विरुद्धं यो वदेत् तस्मान् न चाधमः ॥ २२२ ॥ इति ।

गीता १६।८—

> असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
> अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥ २२३ ॥

इति श्रीगीतोपनिषदादिदृष्ट्यैवानीश्वरवादिन एवं व्याचक्षते ।
असत्यं मिथ्याभूतं सत्यासत्याभ्यामनिर्वचनीयत्वेनाप्रतिष्ठं निर्देशशून्यं स्थाणौ पुरुषत्व-वत् ब्रह्मणीश्वरत्वस्याज्ञानमात्रकल्पितत्वादीश्वराभिमानी तत्र कश्चिन् नास्तीत्यनीश्वरमेव

जगत् । अपरस्परसम्भूतमनाद्यज्ञानपरम्परासम्भूतम् "अपरस्पराः क्रियासातत्ये" । अतः कामहैतुकं मनः सङ्कल्पमात्रजातं स्वप्नवदित्यर्थः ।

अत्र "प्रवृत्तिं च" (गीता १६।७) इत्यादिना तेषां संस्कारदोष उक्तः "एतां दृष्टिम्" (गीता १६।९) इत्यादिना तु गतिश्च निन्दिष्यत इति ज्ञेयम् ।

एभिरेव ब्रह्मण ऐश्वर्योपाधिर्मायापि जीवाज्ञानकल्पिता तयैव जगत्सृष्टिरिति मतम् । यदुक्तं तदीयभाष्ये "तदनन्यत्वम्" (ब्र० सू० २।१।१४) इत्यादिसूत्रे "सर्वज्ञेश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वातत्त्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञेश्वरस्य मायाशक्तिः प्रकृतिरिति श्रुतिस्मृत्योरभिलप्येते" इति ।

किन्त्वत्र "विद्याविद्ये मम तनू" (भा० ११।११।३) इत्यादिश्रीभगवद्वाक्येन तु विरुद्धमिति । अतो मायावादतया चायं वादः ख्यायते ।

तदेवं च पाद्मोत्तरखण्डे देवीं प्रति पाषण्डशास्त्रं गणयता श्रीमहादेवेनोक्तम् (प० पु० ६।९३।६६, ६९) —

मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते ।
मयैवं कथितं देवि कलौ ब्राह्मणरूपिणा ॥ २२४ ॥
वेदान्ते तु महाशास्त्रे मायावादमवैदिकम् ।
मयैव वक्ष्यते देवि जगतां नाशकारणात् ॥ २२५ ॥ इति ।

तच् चासुराणां मोहनार्थं भगवत एवाज्ञयेति तत्रैवोक्तमस्ति । तथा च पाद्म एवान्यत्र शैवे च —

द्वापरादौ युगे भूत्वा कलया मानुषादिषु ।
स्वागमैः कल्पितैस्त्वं तु जनान् मद्विमुखान् कुरु ॥ २२६ ॥

इति श्रीभगवद्वाक्यमिति दिक् । अत एवोक्तं श्रीनृसिंहपुराणे यमवाक्ये (९।६) —

विषधरकणभक्षशङ्करोक्तीर्दशबलपञ्चशिखाक्षपादवादान् ।
महदपि सुविचार्य लोकतन्त्रं भगवदुपास्तिमृते न सिद्धिरस्ति ॥ २२७ ॥ इति ।

सर्वेऽत्र वादग्रन्था एव निर्दिष्टाः । न तु मन्त्रग्रन्था इति नामाक्षरमेव साक्षान् निर्दिष्टमिति च नान्यथा मननीयम् । "आनन्दमयोऽभ्यासात्" (ब्र० सू० १।१।१२) इत्यादिषु वेदान्तसूत्रकारमतं तत्र दूष्यत इति । अतो यत् क्वचित् तत्तत्प्रशंसा वा स्यात् तदपि नितान्तनास्तिकवादं निर्जित्यांशेनाप्यास्तिक्यवादः ख्यापित इत्यपेक्षया ज्ञेयम् ।

तस्मात् स्वतन्त्र ईश्वर एव सर्वस्रष्टा न तु जीवः स्वाज्ञानेन स्वशक्त्यैवेत्यायातम् । तदुक्तं श्रीबादरायणेनापि बहुत्र "सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत् कुर्वत उपदेशात्" (ब्र० सू० २।४।२०) इत्यादिषु ।

अतः “तन्मनोऽसृजत मनः प्रजापतिम्” इत्यादौ मनःशब्देन समष्टिमनोऽधिष्ठाता श्रीमान-निरुद्ध एव । “बहु स्यां प्रजायेय” (छा० ६।२।३) इति तत्सङ्कल्प एव वा वाच्यः ।
स च सत्यस्वाभाविकाचिन्त्यशक्तिः परमेश्वरस्तुच्छमायिकमपि न कुर्यात् । चिन्तामणी-नामधिपतिः स्वयं चिन्तामणिरेव वा कूटकनकादिवत् । तथा च माध्वभाष्यप्रमाणिता श्रुतिः “अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसृजत” इति ।
एवं च (भा० १०।२।२६) —

> सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
> सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नः ॥ २२८ ॥

इत्यत्र सत्यसङ्कल्पत्वं सत्यपरायणत्वं सृष्ट्यादिलीलात्रयेषु सत्यत्वं सत्यस्य विश्वस्य कारणत्वं सत्य एव विश्वेऽस्मिन्नन्तर्यामितया स्थितत्वं सत्यस्य तस्य सत्यताहेतुत्वं सत्य-वचनस्याव्यभिचारिदृष्टेश्च प्रवर्तकत्वं सत्यरूपत्वमित्येतेषामर्थानामाकृतं परिपाटी च सङ्गच्छते ।
अन्यथा “सत्यस्य योनिम्” इत्यादौ त्रये तत्रापि “निहितं च सत्ये” इत्यत्राकस्मादर्धजर-तीयन्यायेन कष्टकल्पनामयार्थान्तरे तु भगवता स्वप्रतिश्रुतं सत्यकृतं यत् तत्तद् युक्तमे-वेत्यतो ब्रह्मादिभिस्तस्य तथा स्तवे स्वारस्यभङ्गः स्यात् प्रक्रमभङ्गश्च । तस्मात् सत्यमेव विश्वमिति स्थितम् ॥ श्रुतयः श्रीभगवन्तम् ॥

७२ । तदेवम् “न यदिदमग्र आस” (भा० १०।८७।३७) इत्यनेन प्राकृतलयोऽपि सत्कार्य-वादेऽनुगमितः । आत्यन्तिके तु मोक्षलक्षणलये न पृथिव्यादीनां नाशः । जीवकृतेन तथा भावनामात्रेण स्वाभाविकपरमात्मशक्तिमयानां तेषां नाशायुक्तेः । लब्धमोक्षेषु श्रीपरीक्षि-तादिषु तद्देहस्थानामपि पृथिव्याद्यंशानां स्थितेः श्रवणात् तथा हिरण्यगर्भांशानां बुद्ध्या-दीनामपि भविष्यति । अतस्तेष्वध्यासपरित्याग एवात्यन्तिकलय इत्युच्यते ।
अत एव (भा० १२।५।५) —

> घटे भिन्ने घटाकाश आकाशः स्याद् यथा पुरा ।
> एवं देहे मृते जीवो ब्रह्म सम्पद्यते पुनः ॥ २२९ ॥

इत्यत्र । तथा (भा० १२।५।११-१२) —

> एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥ २३० ॥
> दशन्तं तक्षकं पादे लेलिहानं विषाननैः ।
> न द्रक्ष्यसि शरीरं त्वं विश्वं च पृथगात्मनः ॥ २३१ ॥

इत्यत्राप्युपाधेः संयोग एव परित्यज्यते न तु तस्य मिथ्यात्वं प्रतिपाद्यते ।
तथा हि बुद्धीन्द्रियेत्यादिप्रकरणम् । तत्र तदाश्रयत्वतत्प्रकाश्यत्वतद्व्यतिरिक्तत्वेभ्यो हेतु-भ्यो बुद्धीन्द्रियादीनां परमात्मस्वभावशक्तिमयत्वमाह (भा० १२।४।२३) —

बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ।
दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् ॥ २३२ ॥

अन्तकरणबहिःकरणविषयरूपेण परमात्मलक्षणं ज्ञानमेव भाति तस्मादनन्यदेव बुद्ध्यादिवस्त्वित्यर्थः । यतस्तदाश्रयं तेषामाश्रयरूपं तज् ज्ञानम् । क्लीबत्वमार्षम् । तथापि राजभृत्ययोरिवात्यन्त एव भेदः स्यात् ।
तत्र हेत्वन्तरेऽप्याह — दृश्यत्वं तत्प्रकाश्यत्वमव्यतिरेकस्तद्व्यतिरेके व्यतिरेकस्ताभ्याम् । तस्मात् "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा" (वि० पु० १।२२।५५) इत्यादिवद् बुद्ध्यादीनां तत्स्वाभाविकशक्तिमयत्वमेव सेत्स्यतीति भावः ।
यत् खल्वाद्यन्तवद् वणिग्वीथ्यादौ सिद्धं शुक्त्यादौ कदाचिदेवारोपितं रजतं तत् पुनरवस्तु तदाश्रयकत्वतत्प्रकाश्यकत्वतदव्यतिरेकाभावात् शुक्त्यादिवस्तु न भवति शुक्त्यादिभ्योऽनन्यन् न भवतीत्यर्थः । ततश्चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा विरुध्येतेति भावः । एवमसत्कार्यवादान्तरेऽपि ज्ञेयम् ॥

७३ । एकस्यापि वस्तुनोऽंशभेदेनाश्रयाश्रयित्वं स्वयमेव दृष्टान्तेन स्पष्टयति (भा० १२।४।२४) —

दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग् भवेत् ।
एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २३३ ॥

दीपश्चक्षूरूपाणां महाभूतज्योतिरंशरूपत्वाद् दीपादिकं न ततः पृथक् । एवं धीप्रभृतीनि ऋतात् परमात्मनो न पृथक् स्युः । तथापि यथा महाभूतज्योतिर्दीपादिदोषेण न लिप्यते तथा बुद्ध्यादिदोषेण परमात्मापि । तद्वदस्याप्यन्यतमत्वादित्याह "अन्यतमात्" इति ।

७४ । तदेवं धीप्रभृतीनां परमात्मस्वाभाविकशक्तिमयत्वमुक्त्वा तथापि तेभ्यो बहिरङ्गशक्तिमयेभ्योऽन्तरङ्गशक्तितटस्थशक्तिविशिष्टपरमात्मनोऽन्यतमत्वेन तेषामशुद्धत्वव्यञ्जनया सदोषत्वमुक्त्वा तेषु धीप्रभृतिष्वध्यासं परित्याजयितुं तिसृषु धीवृत्तिषु तावच्छुद्धस्यैव जीवस्य सकारणमध्यासमाह (भा० १२।४।२५) —

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ।
मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि ॥ २३४ ॥

बुद्धिवृत्तिरूपं जागरणं स्वप्नः सुषुप्तिरितीदं प्रत्यगात्मनि शुद्धजीवे विश्वतैजसप्राज्ञत्वाख्यं नानात्वं मायामात्रं मायाकृताध्यासमात्रेण जातमित्यर्थः ॥

७५ । ततः परमात्मनि बुद्ध्यादिमयस्य जगतः सतोऽपि सम्पर्कः सुतरां नास्तीत्याह (भा० १२।४।२६) —

यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ।
ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २३५ ॥

यथा व्योम्नि व्योमकार्यवायुज्योतिःसलिलपार्थिवांशधूमपरिणता जलधराः स्वेषामेवावयविनामुदयाद् भवन्ति दृश्यन्ते । अप्ययान् न भवन्ति न दृश्यन्ते च ते च तन् न स्पृशन्तीति अर्थः । तथा ब्रह्मणीदं विश्वमिति योज्यम् ।
अवयवि स्थूलरूपं विश्वमुदयः पुरुषोत्तमदृष्टिजातः स्पष्टीभावः । अप्ययस्तद्दृष्टिनिमीलनजातस्तद्विपर्ययः । ततः सूक्ष्मरूपेण तस्य स्थितिरस्त्येव जगच्छक्तिविशिष्टकारणास्तित्वात् ।
इत्थमेवोक्तम् "सतोऽभिव्यञ्जकः कालः" (भा० ११।२४।१९) इति ॥

७६ । तदेव वक्तुं कारणास्तित्वं दृष्टान्तेन प्रतिपादयति (भा० १२।४।२७) —

सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह ।
विनार्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः ॥ २३६ ॥

सर्वेषामवयविनां स्थूलवस्तूनामवयवः कारणं सत्यं सत्यो व्यभिचाररहितः प्रोक्तः । लोके तथा दर्शनादित्याह "विना" इति । अर्थेन स्थूलरूपेण पटेनापि विना ॥

७७ । तस्मिन् कार्यास्तित्वमपि व्यतिरेकेण प्रतिपादयति "यत् सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः" (भा० १२।४।२८) ।
अयमर्थः — यद्येवमुच्यते पूर्वं सूक्ष्माकारेणापि जगन् नासीत् किन्तु सामान्यं केवलं शुद्धं ब्रह्मैवासीत् तदेव शक्त्या निमित्तभूतया विशेषाकारेण जगद्रूपेण परिणतमिति तदसत् । यतो यदेव सामान्यविशेषाभ्यामुपलभ्येत स भ्रमो विवर्तवाद एव । तत्र हि शुद्धं ब्रह्मैवाज्ञानरूपया शक्त्या जगत्तया विवृतमिति मतम् । न चास्माकं तदभ्युपपत्तिः परिणामवादस्य सत्कार्यतापूर्वकत्वादित्यर्थः ॥

७८ । नन्वपूर्वमेव कार्यमारम्भविवर्तवादिनामिव युष्माकमपि जायताम् ? तत्राह "अन्योन्यापाश्रयात् सर्वमाद्यन्तवदवस्तु यत्" (भा० १२।४।२८) ।
यदाद्यन्तवदपूर्वं कार्यं तत् पुनरवस्तु निरूपणासहमित्यर्थः । तत्र हेतुः — अन्योन्यापश्रयात् । यावत् कार्यं न जायते तावत् कारणत्वं मृच्छुक्त्यादेर्न सिध्यति कारणत्वासिद्धौ च कार्यं न जायत एवेति परस्परसापेक्षत्वदोषात् ।
ततः कारणत्वसिद्धये कार्यशक्तिस्तत्रावश्यमभ्युपगन्तव्या । सा च कार्यसूक्ष्मावस्थैवेति कार्यास्तित्वं सिध्यति । तथापि स्थूलरूपतापादकत्वान् मृदादेः कारणत्वमपि सिध्यतीति भावः ॥

७९ । तदेवं स्वाभाविकशक्तिमयमेव परमात्मनो जगदित्युपसंहरति (भा० १२।४।२९) —

विकारः ख्यायमानोऽपि प्रत्यगात्मानमन्तरा ।
न निरूप्योऽस्त्यणुरपि स्याच् चेच् चित्सम आत्मवत् ॥ २३७ ॥

यद्यपि ख्यायमामनः प्रकाशमान एव तथापि स्वल्पोऽपि विकारः प्रत्यगात्मानं परमात्मानं विना तद्व्यतिरेकेण स्वतन्त्रतया न निरूप्योऽस्ति । तदुक्तं तदनन्यत्वविवरण एव । यदि च तं विनापि स्यात् तदा चित्समः स्याच् चिद्रूपेण समः स्वप्रकाश एवाभविष्यत् । आत्मवत् परमात्मवन् नित्यैकावस्थश्चाभविष्यत् ॥

८० । ननु यदि परमात्मानं विना विकारो नास्ति तर्हि परमात्मनः सोपाधित्वे निरुपाधित्वं न सिध्यति । तस्मात् सोपाधेर्निरुपाधिरन्य एव किम् ?
इत्यत्राह (भा० १२।४।३०) —

न हि सत्यस्य नानात्वमविद्वान् यदि मन्यते ।
नानात्वं छिद्रयोर्यद्वज् ज्योतिषोर्वातयोरिव ॥ २३८ ॥

सत्यस्य परमात्मनो नानात्वं न हि विद्यते । यदि तस्य नानात्वं मन्यते तर्ह्यविद्वान् यतस्तस्य निरुपाधित्वसोपाधित्वलक्षणं नानात्वं महाकाशघटाकाशयोर्यद्वत् तद्वद् गृहाङ्गनगतसर्वव्यापितेजसोरिव बाह्यशरीरवाय्वोरिव चेति ॥

८१ । यस्माद् "विकारः ख्यायमानोऽपि प्रत्यगात्मानमन्तरा न निरूप्योऽस्त्यणुरपि" (भा० १२।४।२९) तस्मात् सर्वशब्दवाच्योऽपि स एवेति सदृष्टान्तमाह (भा० १२।४।३१) —

यथा हिरण्यं बहुधा प्रतीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥ २३९ ॥

क्रियाभिस्तत्तद्रचनाभेदैर्बहुधा कटककुण्डलादिरूपेण यथा सुवर्णमेव वचोभिस्तत्तन्नामभिः प्रतीयते तथा लौकिकवैदिकैः सर्वैरेव वचोभिर्भगवानेव व्याख्यायते । तदुक्तम् "सर्वनामाभिधेयश्च सर्ववेदेडितश्च सः" इति स्कान्दे ॥

८२ । तदेवं जगतः परमात्मस्वाभाविकशक्तिशक्तिमयत्वमुक्त्वा तेन च जीवकर्तृकेण ज्ञानेन तन्नाशनासामर्थ्यं व्यज्य मोक्षार्थं तदध्यासपरित्यागमुपदेष्टुं परमात्मशक्तिमयस्यापि तस्योपाध्यध्यासात्मकस्याहङ्कारस्य जीवस्वरूपप्रकाशावरकत्वरूपं दोषं सदृष्टान्तमुपपादयति (भा० १२।४।३२) —

यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ।
एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबन्धनः ॥ २४० ॥

अर्करश्मय एव मेघरूपेण परिणता वर्षन्ति —

अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज् जायत वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ २४१ ॥

इति वचनात् । अयमर्थः—यथार्कप्रभवोऽर्केणैव दर्शितः प्रकाशितश्च घनो निविडो मेघोऽर्कांशभूतस्य चक्षुषस्तमो दिवि भूमौ च महान्धकाररूपो भवति । एवमहं प्राकृताहङ्कारो ब्रह्मगुणः परमात्मशक्तिकार्यभूतस्तदीक्षितस्तेनैव परमात्मना प्रकाशितश्च ब्रह्मांशकस्य तटस्थशक्तिरूपत्वात् परमात्मनो यो हीनांशस्तस्यात्मनो जीवस्य आत्मबन्धनः स्वरूपप्रकाशावरको भवति ॥

८३ । स चाध्यासपरित्यागः स्वतो न भवति किन्तु परमात्मजिज्ञासया तत्प्रभावेनैवेति वक्तुं पूर्ववदेव दृष्टान्तपरिपाटीमाह (भा० १२।४।३३)—

घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ।
यदा ह्यहङ्कार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ २४२ ॥

घनो यदार्कप्रभवो विदीर्यते इति दृष्टान्तांशे तद्विदारणस्य न चक्षुःशक्तिसाध्यत्वं किन्तु सूर्यप्रभावसाध्यत्वमिति व्यक्तम् । अनेन दार्ष्टान्तिकेऽपि आत्मनः परमात्मनो जिज्ञासया जातेन तत्प्रसादेनाहङ्कारो नश्यति पलायत इत्यत्रांशे पुरुषज्ञानसाध्यत्वमहङ्कारनाशस्य खण्डितम् ।
अतो विवर्तवादो नाभ्युपगतः । अत्र चोपाधिरिति विशेषणेन स्वरूपभूताहङ्कारस्त्वन्य एवेति स्पष्टीभूतम् ।
एवं यथा दृष्टान्ते घनमयमहान्धकारावरणाभावात् तत्प्रभावेण योग्यतालाभाच्च चक्षुः कर्तृभूतं स्वरूपं कर्मभूतमीक्षते स्वस्वरूपप्रकाशमस्तित्वेन जानाति स्वशक्तिप्राकट्यं लभत इत्यर्थः ।
कदाचित् तदीक्षणोन्मुखः सन् रविं चेक्षते तथा दार्ष्टान्तिकेऽप्यनुस्मरेत् स्मर्तुमनुसन्धातुं योग्यो भवति । आत्मानं परमात्मानं चेति शेषः ॥

८४ । निगमयति (भा० १२।४।३४)—

यदैवमेतेन विवेकहेतिना मायामयाहङ्करणात्मबन्धनम् ।
छित्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग सम्प्लवम् ॥ २४३ ॥

एतेन पूर्वोक्तविवेकशस्त्रेण मायामयेति विशेषणं स्वरूपभूताहङ्कारस्य व्यवच्छेदार्थम् । अवतिष्ठते स्वस्वरूपेणावस्थितो भवति । न केवलमेतावदेव । अच्युतात्मानुभवः—अच्युतेऽच्युतनाम्न्यात्मनि परमात्मन्यनुभवो यस्य तथाभूत एव सन्नवतिष्ठते ॥ श्रीशुकः ॥

८५ । अत्रायमप्येकेषां पक्षः — परमेश्वरस्य शक्तिद्वयमस्ति स्वरूपाख्या मायाख्या चेति । पूर्वया स्वरूपवैभवप्रकाशनमपरया त्विन्द्रजालवत्तयैव मोहितेभ्यो जीवेभ्यो विश्वसृष्ट्यादिदर्शनम् । दृश्यते चैकस्य नानाविद्यावतः कस्यापि तथा व्यवहारः । न चैवमद्वैतवादिनामिवेदमापतितम् । सत्येनैव कर्त्रा सत्यमेव द्रष्टारं प्रति सत्ययैव तया शक्त्या वस्तुनः स्फोरणात् लोकेऽपि तथैव दृश्यत इति भवत्वपीदं नाम । यतः —

सत्यं न सत्यं नः कृष्णपादाब्जामोदमन्तरा ।
जगत् सत्यमसत्यं वा कोऽयं तस्मिन् दुराग्रहः ॥ २४४ ॥

तदेतन्मते "सत इदमुत्थितम्" (भा० १०।८७।३६) इत्यादिवाक्यानि प्रायो यथाटीकाव्याख्यानमेव ज्ञेयानि । क्वचित् तत्कृतानुमानादौ भेदमात्रस्यासत्त्वे प्रसक्ते वैकुण्ठादीनामपि तथात्वप्रसक्तिस्तन्मते स्यादित्यत्र तु तेषामयमभिप्रायः —
वयं हि यल्लोकप्रत्यक्षादिसिद्धं वस्तु तदेव तत्सिद्धवस्त्वन्तरदृष्टान्तेन तद्धर्मकं साधयामः । यत् तु तदसिद्धं शास्त्रविद्वदनुभवैकगम्यतादृशत्वं तत् पुनस्तद्दृष्टान्तपरार्धादिनाप्यन्यथा कर्तुं न शक्यत एवेति । जीवेश्वराभेदस्थापना च चिद्रूपतामात्र एवेति ।
अथ स्वाभाविकमायाशक्त्या परमेश्वरो विश्वसृष्ट्यादिकं करोति जीव एव तत्र मुह्यतीत्युक्तम् । तत्र सन्देहं प्रश्नोत्तराभ्यां परिहरत्यष्टभिः । श्रीविदुर उवाच (भा० ३।७।२) —

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥ २४५ ॥

हे ब्रह्मन् ! चिन्मात्रस्य चिन्मात्रस्वरूपस्य सतः स्वरूपशक्त्या भगवतः श्रीवैकुण्ठादिगततादृशैश्वर्यादियुक्तस्य ।
अत एव निर्गुणस्य प्राकृतगुणास्पृष्टस्यात एव चाविकारिणस्तादृक्स्वरूपशक्तिविलासभूतानां क्रियाणामनन्तानामपि सदोदित्वरानन्तविधप्रकाशे तस्मिन् नित्यसिद्धत्वात् तत्तत्क्रियाविर्भावकर्तुस्तस्यावस्थान्तरप्राप्तत्वाभावात् प्राकृतकर्तुरिव न विकारापत्तिरिति ।
निर्विकारस्य च कथं सत्त्वादयः प्राकृतगुणाः ? कथं वा तदासङ्गहेतुकाः स्थित्यादयः क्रियाश्च युज्येरन् ? ततश्च चिन्मात्रवस्तुविरोधादेव ते च ताश्च न युज्यन्ते । भगवत्त्वे तु स्वैरचेष्टयापि न युज्येरन्नित्याह "लीलया वापि" इति ।
अत्राविकारित्वनिर्गुणत्वाभ्यां सह चिन्मात्रत्वं भगवत्त्वं चेत्युभयमपि स्वीकृत्यैव पूर्वपक्षिणा पृष्टम् । ततश्च तस्य चिन्मात्रस्वरूपस्य भवतु भगवत्त्वं तत्रास्माकं न सन्देहः किन्तु तस्य कथमितरगुणादिस्वीकारो युज्यत इत्येव पृच्छ्यत इति वाक्यार्थः ॥

८६ । ततश्चिन्मात्रत्वे भगवत्त्वे च तस्य तुच्छा गुणाः क्रियाश्च न सम्भवन्त्येवेति द्विगुणीभूयैव प्रश्नः । किं चार्भकवल्लीलापि न युज्यते वैषम्यातित्याह (भा० ३।७।३) —

क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः ।
स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ॥ २४६ ॥

उद्यमयति प्रवर्तयति इत्युद्यमः । अर्भकस्य क्रीडायां प्रवृत्तिहेतुः कामोऽस्ति । अन्यतस्तु वस्त्वन्तरेण बालान्तरप्रवर्त्तनेन वा तस्य क्रीडेच्छा भवति । भगवतस्तु स्वतः स्वेनात्मना स्वरूपवैभवेन च तृप्तस्य । अत एवान्यतः सदा निवृत्तस्य च कथमन्यतो जीवाज् जगतश्च निमित्तात् चिक्रीडिषेति ॥

८७ । न च तस्य ते गुणास्ताः क्रियाश्च न विद्यन्ते इत्यपलपनीयं तत्रैव प्रसिद्धेरित्याह (भा० ३।७।४) —

अस्राक्षीद् भगवान् विश्वं गुणमय्यात्ममायया ।
तया संस्थापयत्येतद् भूयः प्रत्यपिधास्यति ॥ २४७ ॥

गुणमय्या त्रैगुण्यव्यञ्जिन्या आत्माश्रितया मायया संस्थापयति पालयति प्रत्यपिधास्यति प्रातिलोम्येन तिरोहितं करिष्यति ॥

८८ । जीवस्य च कथं मायामोहितत्वं घटेत ? इत्याक्षेपान्तरमाह (भा० ३।७।५) —

देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः ।
अविलुप्तावबोधात्मा स युज्येताजया कथम् ॥ २४८ ॥

योऽसौ देशादिभिरविलुप्तावबोध आत्मा जीवः स कथमजयाविद्यया युज्येत ? तत्र देशव्यवधानतो देशगतदोषतो वा चक्षुःप्रकाश इव । कालतो विद्युदिव । अवस्थातः स्मृतिरिव ।
स्वतः शुक्तिरजतमिव । अन्यतो घटादिवस्त्विव न तस्यावबोधो लुप्यते । अव्याहतस्वरूपभूतज्ञानाश्रयत्वादेवेत्यर्थः ॥

८९ । तत्रैव विरोधान्तरमाह (भा० ३।७।६) —

भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः ।
अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ २४९ ॥

एष एक एव भगवान् परमात्मापि सर्वक्षेत्रेषु सर्वस्य जीवस्य क्षेत्रेषु देहेष्ववस्थितः । तत्र सति कथममुष्यैव जीवस्य दुर्भगत्वं स्वरूपभूतज्ञानादिलोपः कर्मभिः क्लेशश्च तस्य वा कुतो नास्ति ? न ह्येकस्मिन् जलादौ स्थितयोर्वस्तुनोः कस्यचित् तत्संसर्गः कस्यचिन् नेति युज्यत इत्यर्थः ॥

९० । तत्र केवलं चिन्मात्रत्वं न सम्भवतीति भगवत्त्वमेवाङ्गीकृत्य श्रीमैत्रेय उवाच (भा० ३।७।९) —

सेयं भगवतो माया यन् नयेन विरुध्यते ।
ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥ २५० ॥

यया विश्वसृष्ट्यादिकं भवति सेयं भगवतोऽचिन्त्यस्वरूपशक्तेर्मायाख्या शक्तिः । यद् या च नयेन तर्केण विरुध्यते तर्कातीततया सेयमप्यचिन्त्येत्यर्थः । यद्यप्येवं द्वयोरप्यचिन्त्य-त्वं तथापि भगवतो मायेत्यनेन व्यक्तत्वात् स्वरूपशक्तेरन्तरङ्गत्वाद् बहिरङ्गाया मायाया गुणैः सत्त्वादिभिस्तत्कार्यैः स्थापनादिलीलाभिश्च नासौ स्पृश्यत इत्यर्थः ।

तत्र केवलं चिन्मात्रत्वं न । तन्त्रेण चायमर्थः—

यद् यया मायया येन भगवता सह न विरुध्यते नासौ विरोधविषयीक्रियत इति । यद् वा येन भगवता न विरुध्यते न सर्वथा निर्विषयीक्रियत इति च ।

एवमेव षष्ठे नवमाध्याये "दुरवबोध इव तवायम्" (भा० ६।९।३४) इत्यादिना गद्येन तस्य सगुणकर्तृत्वं विरुध्य । पुनरथ "तत्र भवान्" (भा० ६।९।३५) इति गद्येनान्तर्यामितया गुणविसर्गपतितत्वेन जीववद् भोक्तृत्वयोगं सम्भाव्य "न हि विरोध उभयम्" (भा० ६।९।३६) इत्यादिगद्येन तत्र तत्रावितर्क्यशक्तित्वमेव च सिद्धान्ते योजितम् ।

तत्र स्वरूपशक्तेरवितर्क्यत्वम् "भगवति" (भा० ६।९।३६) इत्यादिभिर्विशेषणैर्मायाया-श्च आत्ममायामित्यन्तेन दर्शितम् । तत्र "स्वरूपद्वयाभावात्" (भा० ६।९।३६) इत्यस्य तथाप्यचिन्त्यशक्त्या तत्कर्तृत्वं तदन्तःपातित्वं च विद्यत इत्यर्थः ।

"समविषममतीनाम्" (भा० ६।९।३७) इति तु गद्यं तथाप्युच्चावचबुद्धीनां तथा स्फुरसीति प्रतिपत्त्यर्थं ज्ञेयम् । "दुरवबोध इव" इति प्राक्तनगद्ये तु "अशरीरः" (भा० ६।९।३४) इति शरीरचेष्टां विना । "अशरणः" इति भूम्याद्याश्रयं विनेत्यर्थः ।

"अथ तत्र" (भा० ६।९।३५) इत्यादौ स्वकृतेऽपि तस्यापि हेतुकर्तृत्वाद् योजनीयम् । तस्मादत्रापि स्वरूपशक्तेरेव प्राधान्यं दर्शितम् ।

अत एव "ऋतेऽर्थं यत् प्रतीयेत" (भा० २।९।३३) इत्यादौ मायाया आभासस्थानीयत्वं प्रदर्श्य तदस्पृश्यत्वमेव भगवतो दर्शितम् "त्वमाद्यः पुरुषः साक्षात्" इत्यादौ "मायां व्यु-दस्य चिच्छक्त्या" (भा० १।७।२३) इत्यनेन च तथा ज्ञापितम् । "माया परैत्यभिमुखे च विलज्जमाना" (भा० २।७।४७) इत्यनेन च ।

तदेवं भगवति तद्विरोधं परिहृत्य जीवेऽप्यविद्यासम्बन्धत्वमतर्क्यत्वेन दर्शितया तन्मा-ययैव समादधति "ईश्वरस्य" इति । यदित्यनेनैव सम्बध्यते । अर्थवशादत्र च तृतीयया परिणम्यते |

यद् यया ईश्वरस्य स्वरूपज्ञानादिभिः समर्थस्यात एव विमुक्तस्य जीवस्य कार्पण्यं तत्तत्प्र-काशतिरोभावस्तथा बन्धनं तद्दर्शितगुणमयजालप्रवेशश्च भवतीति ।

तदुक्तम् "तत्सङ्गभ्रंशितैश्वर्यम्" (भा० ६।५।१५) इति । तदेतत् सर्वमभिप्रेत्य श्रुतयोऽप्याहुः "स यदजया त्वजाम्" इत्यादाव "अपेतभगः" (भा० १०।८७।३८) इति च ।

अत्र मूलपद्ये भगवतो मायेत्यनेन भगवत्त्वं त्वमायिकमित्यायातम् । इन्द्रस्य मायेत्यत्र यथेन्द्रत्वम् । एवं पूर्वत्रापि ज्ञेयम् ॥

९१ । पुनरपि जीवस्य वस्तुतः स्वीयतत्तदवस्थत्वाभावेऽपि भगवन्माययैव तत्तत्प्रतीति-रिति सदृष्टान्तमुपपादयति (भा० ३।७।१०) —

यदर्थेन विनामुष्य पुंस आत्मविपर्ययः ।
प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥ २५१ ॥

यद् यस्या मायाया हेतोरर्थेन विना अपि । यद्यपि तस्य त्रिकालमेव सोऽर्थो नास्ति तथाप्यात्मविपर्यय आत्मविस्मृतिपूर्वकपराभिमानेनाहमेव तद्धर्मीत्येवंरूपः सोऽर्थः स्यात् ।
तथाह्युपद्रष्टुर्जीवस्य । तृतीयार्थे षष्ठी । स्वप्नावस्थायां जीवेन स्वशिरश्छेदनादिकोऽतीवासम्भवोऽर्थः प्रतीयते । न हि तस्य शिरश्छिन्नं न तु वा स्वशिरश्छेदं कोऽपि पश्येत् । किन्तु भगवन्मायैवान्यत्रसिद्धं तद्रूपमर्थं तस्मिन्नारोपयतीति "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" (ब्र० सू० ३।२।३) इति न्यायेन ॥

९२ । अत एव शुद्धस्यापि सतो जीवस्यौपाधिकेनैव रूपेणोपाधिधर्मापत्तिरिति दृष्टान्तान्तरेणोपपादयतीति (भा० ३।७।११) —

यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः ।
दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ॥ २५२ ॥

यथा जले प्रतिबिम्बितस्यैव चन्द्रमसो जलोपाधिकृतः कम्पादिगुणो धर्मो दृश्यते न त्वाकाशस्थितस्य तद्वदनात्मनः प्रकृतरूपोपाधेर्धर्मः आत्मनः शुद्धस्यासन्नपि "अहमेव सोऽयम्" इत्यावेशान् माययोपाधितादात्म्यापन्नाहङ्काराभासस्य प्रतिबिम्बस्थानीयस्य तस्य द्रष्टुराध्यात्मिकावस्थस्यैव यद्यपि स्यात् तथापि शुद्धोऽसौ तदभेदाभिमानेन तं पश्यतीत्यर्थः । तदुक्तमेकादशे श्रीभगवता (भा० ११।२२।५२) —

नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् ।
एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यते ॥ २५३ ॥ इति ।

तथैवोक्तम् "शुद्धो विचष्टे ह्यविशुद्धकर्तुः" (भा० ५।११।१२) इति । विशब्दस्य चात्र तदावेश एव तात्पर्यम् ।
तस्माद् भगवतोऽचिन्त्यस्वरूपान्तरङ्गमहाप्रबलशक्तित्वाद् बहिरङ्गया प्रबलयाप्यचिन्त्ययापि माययापि न स्पृष्टिः । जीवस्य तु तया स्पृष्टिरिति सिद्धान्तितम् ॥ श्रीशुकः ॥

९३ । एवं सृष्ट्यादिलीलात्रये सामान्यतो योजितेऽपि पुनर्विशेषतः संशय्य सिद्धान्तः क्रियते स्थूणानिखननन्यायेन ।

ननु पालनलीलायां ये येऽवतारास्तथा तत्रैव स्वप्रसादव्यञ्जकस्मिताभयमुद्रादिचेष्टया सुरपक्षपातो युद्धादिचेष्टया दैत्यसंहार इत्यादिका या या वा लीलाः श्रूयन्ते ते च ताश्च स्वयं परमेश्वरेण क्रियन्ते न वा ?

आद्ये पूर्वपक्षस्तदवस्थ एव प्रत्युत पक्षपातादिना वैषम्यं च । अन्ते तेषामवताराणां तासां लीलानां च न स्वरूपभूतता सिध्यतीति सम्प्रतिपत्तिभङ्गः ।

अत्रोच्यते — सत्यं विश्वपालनार्थं परमेश्वरो न किञ्चित् करोति किन्तु स्वेन सहैवावतीर्णान् वैकुण्ठपार्षदान् तथाधिकारिकदेवाद्यन्तर्गतान् तथा तटस्थानन्यांश्च भक्तानानन्दयितुं स्वरूपशक्त्याविष्कारेणैव नानावतारान् लीलाश्चासौ प्रकाशयति । तदुक्तं पाद्मे —

मुहूर्तेनापि संहर्तुं शक्तो यद्यपि दानवान् ।
मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः ॥ २५४ ॥
दर्शनध्यानसंस्पर्शैर्मत्स्यकूर्मविहङ्गमाः ।
स्वान्यपत्यानि पुष्णन्ति तथाहमपि पद्मज ॥ २५५ ॥ इति ।

हरिभक्तिसुधोदये (ह० भ० सु० १४।३१) —

नित्यं च पूर्णकामस्य जन्मानि विविधानि मे ।
भक्तसर्वेष्टदानाय तस्मात् किं ते प्रियं वद ॥ २५६ ॥ इति ।

तथा श्रीकुन्तीदेवीवचनं च "भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः" (भा० १।८।२०) इति ।

अत्र भक्तियोगविधानार्थं तदर्थमवतीर्णं त्वामिति टीकानुमतं च । श्रीब्रह्मवचनं च (भा० १०।१४।३७) —

प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले ।
प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रभो ॥ २५७ ॥

स्वरूपशक्त्यैवाविष्कारश्च श्रीब्रह्मणैव दर्शितः "एष प्रपन्नवरदो रमयात्मशक्त्या यद् यत् करिष्यति गृहीतगुणावतारः" (भा० ३।९।२३) इत्यादिना ।

गृहीता गुणाः कारुण्यादयो यत्र तथाभूतोऽवतारो यस्येत्यर्थः । तदेवं भक्तानन्दार्थमेव तान् प्रकटयतस्तस्याननुसंहितमपि सुरपक्षपातादिविश्वपालनरूपं तन्मायाकार्यं स्वत एव भवति ।

लोके यथा केचिद् भक्ताः परस्परं भगवत्प्रेमसुखोल्लासाय मिलितास्तदनभिज्ञानपि कांश्चिन् मार्दङ्गिकादीन् सङ्गृह्य तद्गुणगानानन्देनोन्मत्तवन् नृत्यन्तो विश्वेषामेवामङ्गलं घ्नन्ति मङ्गलमपि वर्धयन्तीति । तदुक्तम् "वाग् गद्गदा" इत्यादौ "मद्भक्तियुक्तो भुवनं पुनाति" (भा० ११।१४।२४) इति । एवमेवोक्तम —

सृष्ट्यादिकं हरेर्नैव प्रयोजनमपेक्ष्य तु ।
कुरुते केवलानन्दाद् यथा मर्त्यस्य नर्तनम् ॥ २५८ ॥ इति ।

न च वक्तव्यं स्वेन तेषां तैरपि स्वस्यानन्दने स्वतस्तृप्तताहानिः स्यात् तथान्यान् परित्यज्य च तेषामेवानन्दने वैषम्यान्तरमपि स्यादिति ।
तत्राद्ये विशुद्धोर्जितसत्त्वतनुमाश्रितेऽपि मुनिजने स्वतस्तृप्तिपराकाष्ठां प्राप्ते भक्तवात्सल्यदर्शनात् तदनुचर एवासौ गुणो न तु तत्प्रतिघातीति लभ्यते ।
यथा सर्वान् मुनीन् प्रति श्रीपरीक्षिद्वाक्यम् "नेहाथ नामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलम्" (भा० १।१९।२३) इति ।
तथा जडभरतचरितादौ "सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य" (भा० ५।१३।२४) इत्यादि ।
श्रीनारदपूर्वजन्मनि "चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि" (भा० १।५।२४) इति च ।
तथा श्रीकुन्तीस्तवे (भा० १।८।२७) —

नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये ।
आत्मारामाय शान्ताय कैवल्यपतये नमः ॥ २५९ ॥ इति ।

"अकिञ्चना भक्ता एव वित्तं सर्वस्वं यस्य" इति टीका च ।
ततोऽन्यथा चाकृतज्ञतादोषश्च निर्दोषे भगवत्यापतति ।
ततः सिद्धे तथाविधस्यापि भक्तवात्सल्ये भक्तानां दुःखहान्या सुखप्राप्त्या वा स्वानन्दो भवतीत्यायातमेव । किं च परमसारभूताया अपि स्वरूपशक्तेः सारभूता ह्लादिनी नाम या वृत्तिस्तस्या एव सारभूतो वृत्तिविशेषो भक्तिः सा च रत्यपरपर्याया भक्तिर्भगवति भक्तेषु च निक्षिप्तनिजोभयकोटिः सर्वदा तिष्ठति । अत एवोक्तम् "भगवान् भक्तभक्तिमान्" (भा० १०।८६।५९) इति ।
तस्माद् भक्तस्थया तया भगवतस्तृप्तौ न स्वतस्तृप्तिताहानिः । प्रत्युत शक्तित्वेन स्वरूपतो भिन्नाभिन्नाया अपि तस्याः "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" (गीता ४।११) इति न्यायेन भक्तचित्तस्फुरिताया भेदवृत्तेरिव स्फुरणात् । भगवतो "मां ह्लादयत्यस्य भक्तिः" इत्यानन्दचमत्कारातिशयश्च भवति ।
शक्तितद्वतोर्भेदमतेऽपि विशिष्टस्यैव स्वरूपत्वं सम्प्रतिपन्नम् । तदेतत् सर्वमभिप्रेत्य भणितं दुर्वाससं प्रति श्रीविष्णुना (भा० ९।४।६३–६८) —

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ २६० ॥
नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ।
श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ॥ २६१ ॥

ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् ।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ २६२ ॥
मयि निर्बद्धहृदयाः साधवः समदर्शनाः ।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ २६३ ॥
मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥ २६४ ॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि ॥ २६५ ॥ इति ।

अत्र ये दारागारेति त्रयमकृतज्ञतानिवारणे "साधवो हृदयं मह्यम्" इति स्वतस्तृप्तिताहानिपरिहारे । भक्तेः स्वरूपशक्तिसारह्लादिनीसारत्वे च "अहं भक्तपराधीनः" इति द्वयम् । तत्रैव भक्तेष्वपि भक्तिरूपेण तत्प्रवेशे सति विशेषतः "मत्सेवया प्रतीतम्" इत्यपि ज्ञेयम् । ततो न प्राक्तनो दोषः ।

द्वितीयेऽप्येवमाचक्ष्महे — परानन्दने प्रवृत्तिर्द्विधा जायते । परतो निजाभीष्टसम्पत्त्यै क्वचित् तदभीष्टमात्रसम्पत्त्यै च । तत्र प्रथमो नात्राप्युपयुक्तः स्वात्मार्थमात्रतया कुत्रापि पक्षपाताभावात् ।

अत्रोत्तरपक्षे परसुखस्य परदुःखस्य चानुभवेनैव परानुकूल्येनैव प्रवृत्तीच्छा जायते न तु यत्किञ्चिज्ज्ञानमात्रेण चित्तस्य परदुःखास्पर्शे कृपारूपविकारासम्भवात् (भा० १०।१०।१४) —

यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम् ।
जीवसाम्यं गतो लिङ्गैर्न तथाविद्धकण्टकः ॥ २६६ ॥

इति न्यायात् । ततश्च सदा परमानन्दैकरूपेऽपहतकल्मषे भगवति प्राकृतस्य सुखाभिधदुःखस्य प्रसिद्धदुःखस्य च सूर्ये पेचकचक्षुर्ज्योतिष इव तमस इव चात्यन्ताभावात् तत्तदनुभवो नास्त्येव ।

यत् तु भगवति दुःखसम्बन्धं परिजिहीर्षन्तोऽपि केचिदेवं वदन्ति — तस्मिन् दुःखानुभवज्ञानमस्त्येव । तच्च परकीयत्वेनैव भासते न तु स्वीयत्वेनेति । तदपि घट्टकुड्यां प्रभातम् । दुःखानुभवो नाम ह्यन्तःकरणे दुःखस्पर्शः स च स्पर्शः स्वस्माद् भवतु परस्माद् वेति दुःखसम्बन्धाविशेषात् ।

असर्वज्ञतादोषश्च सूर्यदृष्टान्तेनैव परिहृतः प्रत्युत गुणत्वेनैव दर्शितश्च ।

तस्मात् तस्मिन् यत् किञ्चिद् दुःखज्ञानमस्तु दुःखानुभवस्तु नास्त्येव । यत एव कर्तुमकर्तुमन्यथाकर्तुं समर्थे परमकरुणामयनिचयशिरोमणौ तस्मिन् विराजमानेऽप्यद्यापि जीवाः संसारदुःखमनुभवन्तीत्यत्र नैर्घृण्यपरिहारश्च भवति ।

यत् तु भक्तानां सुखं तत्तस्य भक्तिरूपमेव तथा तेषां दुःखं भगवत्प्राप्त्यन्तरायेणैव भवति तत्र चाधिका भगवत्येव चित्तार्द्रता जायते सा च भक्तिरेवेति । क्वचिद् गजेन्द्रादीनामपि प्राकृत एव दुःखे "स एव मम शरणम्" इत्यादिना तथैव भक्तिरुद्भूतैवेति ।

क्वचिद् यमलार्जुनादिषु श्रीनारदादिभक्तानां भक्तिः स्फुटैवेति च सर्वथा दैन्यात्मकभक्त-भक्त्यनुभव एव तं करुणयति न तु प्राकृतं दुःखम — योग्ये कारणे सत्ययोग्यस्य कल्पनानौचित्यात् । दुःखसद्भावस्यैव कारणत्वे सर्वसंसारोच्छित्तेः ।
अथ तस्य परम्पराकारणत्वमस्त्येव चेदस्तु न कापि हानिरिति । तस्मादुभयथा भक्तानन्दने तद्भक्त्यनुभव एव भगवन्तं प्रवर्तयतीति सिद्धम् ।
तत एतदुक्तं भवति — यद्यन्यस्य सुखदुःखमनुभूयापि तत्परित्यागेनेतरस्य सुखं दुःखहानिं वा सम्पादयति तदैव वैषम्यमापतति । श्रीभगवति तु प्राकृतसुखदुःखानुभवाभावान् न तदापतति यथा कल्पतरौ । तदुक्तं श्रीमदक्रूरेण (भा० १०।३८।२२) —

न तस्य कश्चिद् दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ।
तथापि भक्तान् भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २६७ ॥ इति ।

अत्र भक्तादन्य एव कश्चिदिति ज्ञेयम् "कः पण्डितस्त्वदपरं शरणं समीयाद् भक्तप्रियादृतगिरः सुहृदः कृतज्ञात्" (भा० १०।४८।२६) इत्येतत् तद्वाक्येनैव तत्प्रियत्वप्रोक्तेः ।
श्रीमहादेवेनाप्युक्तम् (भा० ६।१७।३३–३४) —

न ह्यस्यास्ति प्रियः कश्चिन् नाप्रियः स्वः परोऽपि वा ।
आत्मत्वात् सर्वभूतानां सर्वभूतप्रियो हरिः ॥ २६८ ॥
तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ।
सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः ॥ २६९ ॥ इति ।

तथोक्तं श्रीप्रह्लादेनापि (भा० ८।२३।८) —

चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ।
सर्वात्मनः समदृशोऽविषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ २७० ॥ इति ।

अर्थश्च — यत् त्वं भक्तप्रियोऽसि सोऽपि समदृशस्तव स्वभावोऽविषमो विषमो न भवति । तत्र हेतुगर्भविशेषणम — कल्पतरुस्वभाव इति । तस्माद् विषमस्वभावतया प्रतीतेऽपि त्वय्यवैषम्यमित्यतीव चित्रमिति ।
अथवा परत्रापि कल्पवृक्षादिलक्षणे समान एवाश्रयणीये वस्तुनि भक्तपक्षपातरूपवैषम्यदर्शनात् तद् वैषम्यमपि समस्यैव स्वभाव इति लब्धे तदपरिहार्यमेवेति सिद्धान्तयितव्यम् । ततश्च विषमस्वभाव इत्येव व्याख्येयम् ।
तथा पूर्वत्रापि "भक्तान् भजते" (भा० १०।३८।२२) इति वैषम्य एव योजनीयमिति । वस्तुतस्तु श्रीभगवत्यचिन्त्यमैश्वर्यमेव मुख्यस्तदविरोधे हेतुः ।
यदुक्तम् "नमो नमस्तेऽस्त्वृषभाय सात्वताम्" (भा० २।४।१४) इत्यादौ द्वितीयस्य चतुर्थे । टीकायाम् "तदेवं वैषम्यप्रतीतावप्यदोषत्वायाचिन्त्यमैश्वर्यमाह" इति ।
तदुक्तं श्रीभीष्मेण (भा० १।९।२१–२२) —

सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः ।
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २७१ ॥
तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम् ।
यन् मेऽसूंस्त्यजतः साक्षात् कृष्णो दर्शनमागतः ॥ २७२ ॥ इति ।

तथा श्रीभगवता (गीता ९।२९) —

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २७३ ॥ इति ।

तदेवं तत्तददोषे भक्तपक्षपातस्य स्वरूपशक्तिसारभूतत्वे भक्तविनोदार्थमेव स्वरूपशक्त्यैव स्वयमेव च तत्तदवतारलीलाः करोति भगवान् ततो विश्वपालनं तु स्वयमेव सिध्यतीति स्थिते न वैदुरप्रश्नस्तदवस्थः ।
अत्र देवादीनां प्राकृततया तैः सह लीलायां स्वतस्तृप्तताहानिस्तेषु तदंशावेशादिस्वीकारेणाग्रे परिहर्तव्या ।
तथा न चावतारादीनां स्वरूपशक्त्यात्मताहानिः । तथा भक्तविनोदैकप्रयोजनकस्वैरलीलाकैवल्येन चान्यत्र रागद्वेषाभावान् न वैषम्यमपि प्रत्युत पित्तदूषितजिह्वानां खण्डाद् वैरस्य इव तस्मान् निग्रहेऽप्यनुभूयमाने तेषां दुष्टतादिक्षपणलक्षणं हितमेव भवति ।
अत्र (भा० ९।२४।५७–५८) —

न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ।
आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥ २७४ ॥
यन् मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ।
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ २७५ ॥

इति नवमान्तस्थश्रीशुकवाक्यानुसारेण प्रलये लीनोपाधेर्जीवस्य धर्माद्यसम्भवादुपाधिसृष्ट्यादिना धर्मादिसम्पादनेनानुग्रह इति तदीयटीकानुसारेण च ।
तथा (भा० १०।७०।२७) —

लोके भवान् जगति नः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः ।
कश्चित् तदीयमभियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन् न विद्मः ॥
२७६ ॥

इति जरासन्धबद्धराजवृन्दनिवेदनेऽपि ईश्वरे "त्वयि सद्रक्षणार्थमवतीर्णेऽपि चेदस्माकं दुःखं स्यात् तर्हि किमन्यः कश्चिज् जरासन्धादिस्त्वदाज्ञामपि लङ्घयति ? किं च त्वया रक्ष्यमाणोऽपि जनः स्वकर्मदुःखं प्राप्नोतीत्येवेति न विद्मः । न चैतदुभयमपि युक्तमिति भावः" इति ।

तदीयटीकानुसारेण च लीलायाः स्वैरत्वेऽपि दुर्घटघटनी मायैव तदा तदा देवासुरादीनां तत्तत्कर्मोद्बोधसन्धानमपि घटयति । यया स्वस्वकर्मणा पृथगेव चेष्टमानानां जीवानां चेष्टाविशेषाः परस्परशुभाशुभशकुनतया घटिता भवन्तीत्यादिकं लोकेऽपि दृश्यते । यत्र तु क्वचिदेषा तल्लीलाजवमनुगन्तुं न शक्नोति तत्रैव परमेशितुः स्वैरता व्यक्तीभवति ।
यथा (भा० १०।४५।४५) —

गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् ।
आनयस्व महाराज मच्छासनपुरस्कृतः ॥ २७७ ॥

इति यमविषयकश्रीभगवदादेशादौ ।
ततश्च तस्यातिविरलप्रचारत्वान् न सर्वत्र कृतहान्यकृताभ्यागमप्रसङ्गश्च ।
अथ यदि केचिद् भक्तानामेव द्विषन्ति तदा तदा भक्तपक्षपातान्तःपातित्वाद् भगवता स्वयं तद्द्वेषेऽपि न दोषः प्रत्युत भक्तविषयकतद्रतेः पोषकत्वेन ह्लादिनीवृत्तिभूतानन्दोल्लासविशेष एवासौ । येन हि द्वेषेण प्रतिपदप्रोन्मीलत्सान्द्रानन्दवैचित्रीसमतिरिक्तभक्तिरसमरुस्थलब्रह्मकैवल्यापादानरूपत्वेन तदीयभक्तिरसमहाप्रतियोगितया ततोऽन्यथा दुश्चिकित्सतया च तत्रोचितम् ।
तदुत्थभगवत्तेजसा तत्स्वरूपशक्तेरपि तिरस्कारेण ध्वंसाभावतुल्यम् "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" (भा० ६।१७।२८) इति ।
न्यायेनान्येषामतीव दुःसहं तेषामपि कामुकानां निकाममनभीष्टमुद्दण्डदण्डविशेषं कुर्वत्येव भगवति तस्य सर्वहितपर्यवसायिचारित्रस्वभावत्वादेव तत्तद्दुर्वारदुर्वासनामयाशेषसंसारक्लेशनाशोऽपि भवति ।
यः खल्वभेदोपासकानामतिकृच्छ्रसाध्यः पुरुषार्थः क्वचिच्च परमार्थवस्त्वभिज्ञानां नरकनिर्विशेषं तेषां कामिनां तु निकाममभीष्टं विट्कीटानामिवामेध्यं स्वर्गविशेषं तेभ्यो ददाति स परमेश्वरः । अत एवोक्तं नागपत्नीभिः "रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन्" (भा० १०।१६।३३) ।
इत्यत्र सुतानां सुतवत् पाल्यानां देवानामित्यर्थः । दममिति यतो दममपीत्यर्थः ।
यत् तु पूतनादावुत्तमभक्तगतिः श्रूयते तद्भक्तानुकरणमाहात्म्येनैवेति तत्र तत्र स्पष्टमेव ।
यथा "सद्वेषादिव पूतनापि सकुला" (भा० १०।१४।३५) इत्यादि ।
अथ यदि केचिद् भक्ता एव सन्तो भक्तान्तरेषु कथञ्चिदपराध्यन्ति तदा तेनैवापराधेन भक्तेषु भगवति च विवर्तमानं द्वेषबाडवानलज्वालाकलापमनुभूय चिरात् कथञ्चित् पुनः सद्वेषेणापि भगवत्संस्पर्शादिना सपरिकरे तदपराधदोषे विनष्टे स्वपदमेव प्राप्नुवन्ति न तु ब्रह्मकैवल्यं भक्तिलक्षणबीजस्यानश्वरस्वभावत्वात् । तेषु भगवतः क्रोधश्च बालेषु मातुरिवेति । तस्मात् सर्वं समञ्जसम् ।
तथा हि श्रीराजोवाच (भा० ७।१।१) —

समः प्रियः सुहृद् ब्रह्मन् भूतानां भगवान् स्वयम् ।
इन्द्रस्यार्थे कथं दैत्यानवधीद् विषमो यथा ॥ २७८ ॥

परमात्मत्वेन समः सुहृत् हितकारी प्रियः प्रीतिविषयो भगवान् । एवं सति साम्येनैवोपकर्तव्यत्वेन प्रीतिविषयत्वेन च सर्वेष्वेव प्राप्तेषु कथं विषम इव दैत्यानवधीत् ? विषमत्वमुपलक्षणम् । असुहृदि वा प्रिय इव चेति ॥

९४ । किं च यस्य यैः प्रयोजनं सिध्यति स तत्पक्षपाती भवति । येभ्यो बिभेति तान् द्वेषेण हन्ति न तु तदत्रास्तीत्याह (भा० ७।१।२) —

> न ह्यस्यार्थः सुरगणैः साक्षान् निःश्रेयसात्मनः ।
> नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २७९ ॥

निःश्रेयसं परमानन्दः ॥

९५ । अतः (भा० ७।१।३) —

> इति नः सुमहाभाग नारायणगुणान् प्रति ।
> संशयः सुमहान् जातस्तद् भवांश्छेत्तुमर्हति ॥ २८० ॥

गुणाननुग्रहनिग्रहादीन् प्रति । तत्तं संशयम् ॥

९६ । अत्र श्रीऋषिरुवाच (भा० ७।१।४) —

> साधु पृष्टं महाराज हरेश्चरितमद्भुतम् ।
> यद् भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ २८१ ॥

हे महाराज ! इदं यत् पृष्टं तत् साधु सुविचारितमेव । किन्तु हरेश्चरितमद्भुतमपूर्वमवैषम्येऽपि विषमतया प्रतीयमानत्वेन विचारातीतत्वात् । यद् यत्र हरेश्चरिते भगवद्भक्तिवर्धनं भागवतमाहात्म्यं भागवतानां प्रह्लादोपलक्षितभक्तवृन्दानां माहात्म्यं वर्तते ।
अनेन भागवतार्थमेव सर्वं करोति भगवान् न त्वन्यार्थमित्यस्यैवार्थस्य पर्यवसानं भविष्यतीति व्यञ्जितम् ।
टीका च (भा० दी० ७।१।१) —

> स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ।
> नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥ २८२ ॥ इत्येषा ।

९७ । अतो (भा० ७।१।५) —

> गीयते परमं पुण्यमृषिभिर्नारदादिभिः ।
> नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ २८३ ॥

परमं पुण्यं यथा स्यात् तथा या गीयते तां कथामिति यत्तदोरध्याहारेणान्वयः । अत्र च तैर्गीयमानत्वेन भक्तैकसुखप्रयोजनत्वमेव व्यञ्जितम् ॥

९८ । तत्र तावद् व्यञ्जितार्थानुरूपमेव प्रश्नस्योत्तरमाह (भा० ७।१।६) —

> निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
> स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ २८४ ॥

यस्मात् प्रकृतेः परस्तस्मान् निर्गुणः प्राकृतगुणरहितः । तत एवाजो नित्यसिद्धः । अत एव च अव्यक्तः प्राकृतदेहेन्द्रियादिरहितत्वान् नान्येन व्यज्यते इति स्वयम्प्रकाशदेहादिरित्यर्थः । ततश्च प्रकृतिगुणोत्थरागद्वेषादिरहितश्चेति भावः ।
एवमेवम्भूतोऽपि स्वेषु भक्तेषु या माया कृपा तत्रोचितो यो गुणो लीलाकौतुकमयविशुद्धोर्जितसत्त्वाख्यस्तमाविश्यालम्ब्य भगवान् नित्यमेव प्रकाशितषड्गुणैश्वर्यः सन् ।
एतदप्युपलक्षणं कदाचिददित्यादौ जातः सन् लोकेन्द्रियेषु व्यक्तोऽपि सन् बाध्यबाधकतां गतः । निजदृष्टिपथेऽपि स्थातुमसमर्थेषु अतिक्षुद्रेषु देवासुरादिषु स्वसाहाय्यप्रतियोद्धृत्वसम्पादनाय स्वयं सञ्चारितं किञ्चित् तदंशलक्षणमेव तेजः समाश्रित्य बाध्यतां बाधकतां च गतः ।
युद्धलीलावैचित्र्याय प्रतियोद्धृषु तदानीं स्वस्मिन् प्रकाश्यमानादपि तेजसोऽधिकं तेजोऽंशं सञ्चार्य बाध्यतां पराजयं कदाचित् तु तस्मान् न्यूनं सञ्चार्य बाधकतां जयं प्राप्त इत्यर्थः ।
"स्यात् कृपादम्भयोर्माया" इति विश्वप्रकाशः । अत्र सत्यप्यर्थान्तरे भागवतानुग्रहप्रयोजनत्वेनैवोपक्रान्तत्वादुपसंहरिष्यमाणत्वाच्च गतिसामान्याच्च छलमयमायया तत्तत्कर्तृत्वेऽप्यधिकदोषापाताच्च तन् नापेक्षते ।
तस्माद् भक्तविनोदैकप्रयोजनकस्वैरलीलाकैवल्येनान्यत्र रागद्वेषाभावान् नात्र वैषम्यमिति भावः । अत एव बाध्यतामपि यातीति बाधकतया सहैवोक्तम् । तथा निजस्वरूपशक्तिविलासलक्षणलीलाविष्कारेण सर्वेषामेव हितं पर्यवस्यतीति सुहृत्त्वादिकं च नापयातीति ध्वनितम् ॥

९९ । अथ कथं सोऽपि विशुद्धसत्त्वाख्यो गुणः प्राकृतो न भवति ? कदा वा कुत्र तं वीर्यातिशयं सञ्चारयति ? कथां वा कृतहान्यकृताभ्यागमप्रसङ्गो न भवतीत्यादिकमाशङ्क्याह द्वाभ्याम् (भा० ७।१।७) —

> सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
> न तेषां युगपद् राजन् ह्रास उल्लास एव वा ॥ २८५ ॥

सत्त्वादयो गुणाः प्रकृतेरेव नात्मनः । आत्मनः परमेश्वरस्य तस्य तु ये सर्वेऽपि नित्यमेवोल्लासिनो गुणास्ते तु ते न भवन्तीत्यर्थः । तदुक्तम् "सत्त्वादयो न सन्तीशे" (वि० पु०

१।९।४३) इति । “ह्लादिनी सन्धिनी सम्वित् त्वय्येव सर्वसंस्थितौ” (वि० पु० १।१२।६९) इति च ।
यस्मान् नात्मनस्ते तस्मादेव युगपत् ह्रास एव वा उल्लास एव वा नास्ति किन्तु विकारित्वेन परस्परमभ्युपमर्दित्वात् कस्यचित् कदाचित् ह्रासः कस्यचित् कदाचिदुल्लासो भवतीत्यर्थः ॥

१०० । ततश्च देवादीनां तत्साहाय्येऽसुरादीनां च तद्युद्धे योग्यतां दर्शयति । तथा सत्त्वाद्युल्लासकाले तल्लीलायास्तदधीनत्वमिव यत् प्रतीयते तदनुवदन् परिहरति (भा० ७।१।८) —

> जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ।
> तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥ २८६ ॥

सत्त्वस्य जयकाले देवानृषींश्च अभजत् भजति भगवान् तत्प्रकृतितत्तद्देहेषु सत्त्वोपाधिकं निजतेजः सञ्चारयति येन च तान् सहायमानान् करोतीत्यर्थः । एवं रजसो जयकालेऽसुरेषु रजौपाधिकं तमसो जयकाले यक्षरक्षःसु तमौपाधिकमिति योजनीयम् । ततश्च येन तान् यक्षादीन् प्रतियोद्धॄन् कुर्वन् देवादीन् पराजितान् करोति स्वमपि तथा दर्शयतीत्यर्थः । तदेवं भक्तरसपोषलीलावैचित्र्याय बाध्यबाधकतां यातीति दर्शितम् । यच्च क्षीरोदमथने श्रूयते (भा० ८।७।११) —

> तथा सुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ।
> उद्दीपयन् देवगणांश्च विष्णुर्देवेन नागेन्द्रमबोधरूपः ॥ २८७ ॥ इति ।

अत्रापि तद्वैचित्र्यार्थमेव तथा तत्तदावेशस्तस्येति लभ्यते । नन्वायाता तस्य तत्तद्गुणोद्बोधककालपारवश्येन स्वैरलीलाहानिः । ततश्च गुणसम्बन्धातिशये वैषम्यादिकं च स्पष्टमेवेत्याशङ्क्याह “तत्कालानुगुणः” इति । तेषां सत्त्वादीनां काल एवानुगुणो यस्य सः । भगवच्छरण इतिवत् समासः ।
स्वैरमेव क्रीडति तस्मिन् नित्यमेव तदनुगतिकया मायया तदनुसारेणैवानादिसिद्धप्रवाहं तं जगत्कर्मसमुदायं प्रेर्य स्ववृत्तिविशेषरूपत्वेन प्रवर्त्यमानः सत्त्वादिगुणानां काल एव तदधीनो भवतीत्यर्थः । कालस्य मायावृत्तित्वमुदाहृतं “कालो दैवम्” इत्यादौ “त्वन्मायैषा” (भा० १०।६३।२६) इति ।
यद्वा तेषां कालोऽपि सदानुगतो भक्तानुग्रहमात्रार्थस्वैरचेष्टात्मकप्रभावलक्षणो गुणो यस्य स इत्यर्थः । ततोऽपि तच्चेष्टानुसारेणैव मायया तत्तत्प्रवर्तनमिति भावः । यदुक्तम् “योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम्” (भा० १०।३।२६) इति । तथा चोभयथापि न पारवश्यमित्यायातम् । इत्थमेव श्रीकपिलदेवोऽपि “यः कालः पञ्चविंशकः” (भा० ३।२६।१५) इति । “प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्” (भा० ३।२६।१६) इति च । तत्र मायाव्यङ्ग्यत्वपुरुषगुणत्वलक्षणमतद्वयमुपन्यस्तवान् ।

अत्र तस्य चेष्टाप्रभावस्य भक्तविनोदायैव मुख्या प्रवृत्तिः । गुणोद्बोधादिकार्यं तु तत्र स्वत एव भवतीति तत्र प्रवृत्त्याभास एव । ततश्च पूर्वोऽशः स्वयमेवेति स्वरूपशक्तेरेव विलासः परस्तदाभासरूप एवेत्याभासशक्तेर्मायाया एवान्तर्गतः । "योऽयं कालः" इत्यादौ "निमेषादिः" (भा० १०।३।२६) इत्युक्तिस्तु द्वयोरभेदविवक्षयैवेति ज्ञेयम् ।
अत एवं व्याख्येयम—यथा भृत्यस्यानुगतो भृत्योऽनुभृत्यस्तथात्र प्रभावलक्षणस्य गुणस्यानुगत आभासरूपो गुणोऽनुगुणः । तथा च तेषां कालोऽप्यनुगुणो न तु साक्षाद् गुणो यस्येति ॥

१०१ । ननु तेषु तेषु तेनावेश्यमानं तेजः कथं न लक्ष्यते ? तत्राह (भा० ७।१।९)—

> ज्योतिरादिरिवाभाति सङ्घातान् न विविच्यते ।
> विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ २८८ ॥

यद्यपि तेषु तेषु निजतेजोऽंशेनाविष्टोऽसौ सङ्घातात् सम्मिश्रत्वान् न विविच्यते लोकैर्विवेक्तुं न शक्यते तथापि कवयो विवेकनिपुणा अन्ततो मथित्वा तस्यापि साहाय्यं तेनापि युद्धमित्यादिकासम्भवार्थनिषेधेन विविच्य तदंशेनात्मस्थं तत्तदात्मनि प्रविष्टमात्मानमीश्वरं विदन्ति जानन्ति ।
तत्र हेतुगर्भो दृष्टान्तः—यस्मात् तत्तेजः ज्योतिरादिपदार्थ इवाभाति द्रष्टृष्विति विशेषः ।
अयमर्थः—यथा नेदं मणेस्तेजः पूर्वमदर्शनात् किन्तु तदातपसंयोगेन सौरं तेज एवात्र प्रविष्टमिति सूर्यकान्तादौ तृणादिदाहेन तदनुभविषु तदा भाति । यथा च पूर्ववदेव वायोरयं गन्धः पार्थिव एव प्रविष्ट इति तेष्वाभाति तथात्रापीति ।
अथवा नन्वेवं तत्र तत्रावेशितैः स्वतेजोभिरेव क्रीडतीत्यायातम् । कथं तर्हि तैरपि क्रीडतीति दृश्यते ? तत्राह "ज्योतिः" इति ।
यथा चक्षुरादिज्योतिर्भिः स्वांशे रूपमात्रेऽपि प्रकाश्यमाने गन्धादिगुणपञ्चका मृदेवासौ प्रकाशत इति प्रतीयते यथा च कर्णादिनभसा स्वांशे शब्दमात्रेऽपि गृह्यमाने दुन्दुभिरेवासाविति प्रतीयते तच्च तत्तद्गुणानां सम्मिश्रत्वादेव भवति न वस्तुतः ।
तथा कवय आत्मानमीश्वरं तत्तत्सङ्घातस्थत्वेनान्यैरविविक्तमपि आत्मस्थं स्वांशतेजोभिरेव क्रीडन्तं जानन्तीत्यर्थः ॥

१०२ । तदेवं युद्धादिनिजलीलाभिर्भक्तविनोदनमेव प्रयोजनं विश्वपालनं तु ततः स्वत एव सिद्ध्यतीत्युक्त्वा सृष्टिप्रलययोः प्रकृतीक्षणादावपि सर्वाशङ्कनिरासार्थमतिदिशन् त्रिष्वप्यविशेषमाह (भा० ७।१।१०)—

> यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।
> सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ २८९ ॥

यदा यत्र स्वचेष्टालक्षणे काले एष परः परमेश्वरः स्वमायया भक्तकृपया आत्मनः पुरः प्राचीनसृष्टिगतसाधकभक्तरूपाणि स्वस्याधिष्ठानानि सिसृक्षुर्भवति प्रकृत्या सह तेषु लीनेष्वाविर्भावनार्थामीक्षां करोति ।

तदा पृथक् स्वरूपशक्तेरितरासौ जीवमायाख्या शक्तिः पूर्ववत् तच्चेष्टात्मकप्रभावाभासोद्दीप्ता रजः सृजति स्वांशभूताद् गुणत्रयसाम्यादव्यक्तात् तद् विक्षिपति उद्बोधयतीति वा ।
यद्वा पृथङ् मायानुगत एष काल एव सृजति तथा असौपदेन च काल एवोच्यते ।
अथ विचित्रासु नानागुणवैचित्रीमतीषु तल्लक्षणासु पूर्षु यदा रन्तुमिच्छुर्भवति तदासौ सत्त्वं सृजति यदा पुनस्ताभिरेव मिलित्वा शयिष्यमाणः शयितुमिच्छुर्भवतीत्यर्थः । तदासौ तमः सृजतीति । ततो भक्तनिमित्तमेव सर्वा एव सृष्ट्यादिक्रियाः प्रवर्तन्ते इति भावः ।
यथाङ्गीकृतमेकादशस्य तृतीये "ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये" (भा० ११।३।३) इत्यत्र टीकाकृद्भिरपि — किमर्थं ससर्ज ? स्वमात्रात्मप्रसिद्धये । स्वं मिमीते प्रमिमीते य उपास्ते स स्वमाता । तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये । इति ।
शयनमत्र पुरुषावतारस्य कदाचित् प्रलयोदधौ योगनिद्रा कदाचिद् भगवत्प्रवेशो वा । यद्यपि सर्वेष्वपि जीवेष्वन्तर्यामितया परमेश्वरस्तिष्ठति तथापि तत्रासंसक्तत्वादस्थित एव भवति तद्भक्तेषु तु समासक्तत्वान् न तथेति । न च तत्सङ्गादौ तस्येच्छेति यथोक्तव्याख्यानमेव बलवत् । तथा च श्रीभगवदुपनिषदः "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" (गीता ९।४-५) इति ।
"ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" (गीता ९।२९) इति च ।
उक्तं च हरिभक्तिसुधोदये (ह० भ० सु० १४।५७) —

भक्तानां हृदयं शान्तं सश्रियो मे प्रियं गृहम् ।
वसामि तत्र शोभैव वैकुण्ठाख्यादिवर्णना ॥ २९० ॥ इति ।

१०३ । एवं प्रसङ्गेन सृष्टिप्रलयावपि व्याख्याय पुनः पालनमेव व्याचक्षाणः प्रकरणमुपसंहरति सार्धेन (भा० ७।१।११) —

कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव सत्यकृत् ।
य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ।
तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥ २९१ ॥

सत्यकृत् स्वरूपशक्तिविलासेनैव स्वयं परमार्थसत्यक्रियाविर्भावक एव सन् स्वचेष्टारूपं कालं सृजति व्यञ्जयति । किं कुर्वन्तम् ? प्रधानपुम्भ्यां च चरन्तं तत्तत्सम्बन्धानां साधकभक्तानां देवादिप्रविष्टं निजतेजोऽंशानां च साहाय्यहेतोरेव सृज्यमानतया उत्पत्त्यैवाव्यक्तजीवसङ्घाताभ्यां चरन्तम् । अत एव सन्निधानेनैव तयोस्तत्तदवस्थानामाश्रयमुद्भवहेतुं च ।
नरदेवेति सम्बोधनेन यथा निजेहया मुख्यमेव कार्यं कुर्वतस्तव तयैवान्यदपि क्षुद्रतरं स्वयमेव सिध्यति तद्वदिहापीति बोधितम् ।

ततो य एष चेष्टारूपः कालः स सत्त्वं सत्त्वप्रधानं सुरानीकमेधयतीव तत एव तत्प्रत्यनीकान् रजस्तमःप्रधानानसुरान् प्रमिणोतीव हिनस्तीव ये तु देवेषु भक्ता असुरेषु भक्तद्वेषिणस्तान् स्वयं पालयति हिनस्ति चैवेति पूर्वमेवोक्तम् ।
यस्मात् तच्चेष्टालक्षणस्य कालस्यैवं वार्त्ता तस्मादीशितापि एधयतीव प्रमिणोतीव चेति । हे राजन्निति पूर्वाभिप्रायमेव ।
ननु यदि चेशितुः प्रयोजनं न भवति तर्हि कथं कदाप्यसुरानपि स्वपक्षान् विधाय देवैर्न युध्येत ? तत्राह — सुरप्रियः सुरेषु वर्तमानाः प्रिया भक्ता यस्य सः । सत्त्वप्रधानेषु सुरेषु प्रायशस्तेषां सर्वेषामनुगमनेनैव तस्यानुगमनम् । कदाचिद् बृहस्पत्यादिषु महत्स्वपराधे तु येषां मालिन्येन सुरत्वाच्छादनात् तेषां तस्य चैतेष्वननुगमनं स्यादिति । "जयकाले तु सत्त्वस्य" (भा० ७।१।८) इत्याद्युक्तमिति भावः ।
ननु कथं तेऽपि तान् नानुगच्छन्ति ? तत्राह "रजस्तमस्कान्" इति । अत्यन्तभगवद्बहिर्मुखताकरयोस्तयोर्गुणयोररोचकत्वादेवेति भावः ।
तर्ह्यसौ सदैवासुराणां निग्रहमेव करोतीत्यथाप्यसामञ्जस्यमित्याशङ्क्याह — उरुश्रवाः । "वैरेण यं नृपतयः" (भा० ११।५।४८) इति "अहो बकी यं स्तनकालकूटम्" (भा० ३।२।२३) इत्यादिभिरुरु सर्वतो विस्तृतं महत्तमं वा श्रवः कीर्तिर्यस्य सः ।
तेषामप्यनुग्रहं करोतीति भावः ॥

१०४ । तदेवं सिद्धान्तं प्रदर्श्य तत्र स्वभक्तानुग्रहमात्रप्रयोजनस्तत्तत् करोति परेश इति प्रतिज्ञातार्थोदाहरणाय प्रह्लादजयविजयादिकृपायाः सूचकमितिहासविशेषमाह (भा० ७।१।१२) —

> अत्रैवोदाहृतः पूर्वमितिहासं सुरर्षिणा ।
> प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे ॥ २९२ ॥ इत्यादि ।

टीकैव दृश्या ॥ श्रीशुकः ॥

१०५ । तदेवं सर्वेऽपि वैषम्यनैर्घृण्ये परिहृते । ईश्वरस्तु पर्जन्यवद् द्रष्टव्य इत्यस्य — ब्रह्मसूत्रनिर्गलितार्थन्यायस्याप्यत्रैवान्तर्भावसिद्धेः ।
इति ब्रह्मभगवत्परमात्मानो विवृताः । तदेवं त्रिव्यूहत्वमेव व्याख्यातम् । क्वचिद् वासुदेवादिचतुर्व्यूहादित्वं च दृश्यते । स च भेदः कस्यचित् केनचिदभेदविवक्षया भेदविवक्षया च नायुक्तः । तदुक्तं मोक्षधर्मे नारायणीये (म० भा० १२।३३६।५३) —

> एकव्यूहविभागो वा क्वचिद् द्विव्यूहसञ्ज्ञितः ।
> त्रिव्यूहश्चापि सङ्ख्यातश्चतुर्व्यूहश्च दृश्यते ॥ २९३ ॥ इति ।

श्रुतिश्च "स एकधा भवति त्रिधा भवति" (छा० ७।२६।२) इत्याद्या ।

अथ पूर्वरीत्या चतुर्व्यूहत्वाद्यविसंवादितया यदत्र त्रिव्यूहत्वं दर्शितं तत्र प्रथमव्यूहस्य श्रीभगवत एव मुख्यत्वं यत् प्रतिपादकत्वेनैवास्य महापुराणस्य श्रीभागवतमित्याख्या ।
यथोक्तम् "इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्" (भा० १।३।४०) इति ।
तस्य हि प्राधान्ये षड्विधेन लिङ्गेन तात्पर्यमपि पर्यालोच्यते—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥ २९४ ॥

इत्युक्तप्रकारेण । तथा हि तावदुपक्रमोपसंहारयोरैक्येन(भा० १।१।१)—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ २९५ ॥

भा० १२।१३।१९—

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतस्
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥ २९६ ॥

अत्र पूर्वस्यार्थः "अर्थोऽयं ब्रह्मसूत्राणाम्" इति गारुडोक्तेरस्य महापुराणस्य ब्रह्मसूत्राकृत्रिमभाष्यात्मकत्वात् प्रथमं तदुपादायैवावतारः ।
तत्र पूर्वम् "अथातो ब्रह्म जिज्ञासा" (ब्र० सू० १।१।१) इति व्याचष्टे "तेजोवारिमृदाम्" इत्याद्यर्धेन । योजनायां प्राथमिकत्वादस्य पूर्वत्वम् । तत्र ब्रह्मजिज्ञासा इति व्याचष्टे "परं धीमहि" इति ।
परं श्रीभगवन्तं धीमहि ध्यायेम । तदेवं मुक्तप्रग्रहया योगवृत्त्या बृहत्त्वाद् ब्रह्म यत् सर्वात्मकं तद् बहिश्च भवति । तत् तु निजरश्म्यादिभ्यः सूर्य इव सर्वेभ्यः परमेव स्वतो भवतीति मूलरूपत्वप्रदर्शनाय परपदेन ब्रह्मपदं व्याख्यायते । तच् चात्र भगवानेवेत्यभिमतम् । पुरुषस्य तदंशत्वान् निर्विशेषब्रह्मणो गुणादिहीनत्वात् ।
उक्तं च श्रीरामानुजचरणैः "सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः । बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयः सोऽस्य मुख्योऽर्थः । स च सर्वेश्वर एव" इति ।
उक्तं प्रचेतोभिः "न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे" (भा० ४।३०।३१) । तत एव विविधमनोहरानन्ताकारत्वेऽपि तत्तदाकाराश्रयपरमाद्भुतमुख्याकारत्वमपि तस्य व्यञ्जितम् । तदेवं मूर्तत्वे सिद्धे तेनैव परत्वेन तस्य विष्ण्वादिरूपकभगवत्त्वमेव सिद्धं तस्यैव ब्रह्मशिवादिपरत्वेन दर्शितत्वात् ।

अत्र जिज्ञासेत्यस्य व्याख्या "धीमहि" इति । यतस्तज्जिज्ञासायास्तात्पर्यं तद्ध्यान एव । तदुक्तमेकादशे स्वयं भगवता (भा० ११।११।१८) —

शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।
श्रुतस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ २९७ ॥ इति ।

ततो धीमहीत्यनेन श्रीरामानुजमतं जिज्ञासापदं निदिध्यासनपरमेवेति । स्वीयत्वेनाङ्गीकरोति श्रीभागवतनामा सर्ववेदादिसाररूपोऽयं ग्रन्थ इत्यायातम् । धीमहीति बहुवचनं कालदेशपरम्परास्थितस्य सर्वस्यापि तत्कर्तव्यताभिप्रायेणानन्तकोटिब्रह्माण्डान्तर्यामिणां पुरुषाणामंशिभूते भगवत्येव ध्यानस्याभिधानात् । अनेनैकजीववादजीवनभूतो विवर्तवादोऽपि निरस्तः ।
ध्यायतिरपि भगवतो मूर्तत्वमपि बोधयति ध्यानस्य मूर्त एवाकष्टार्थत्वात् । सति च सुसाध्ये पुमर्थोपाये दुःसाध्यस्य पुरुषाप्रवृत्त्या स्वत एवापकर्षात् तदुपासकस्यैव युक्ततमत्वनिर्णयाच्च ।
तथा च गीतोपनिषदः (गीता १२।२–३, १२।५) —

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २९८ ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ २९९ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ३०० ॥ इति ।

इदमेव च विवृतं ब्रह्मणा (भा० १०।१४।४) —

श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम् ॥ ३०१ ॥
इति ।

अत एवास्य ध्येयस्य स्वयं भगवत्त्वमेव साधितम् । शिवादयश्च व्यावृत्ताः । तथा धीमहीति लिङा द्योतिता पृथगनुसन्धानरहिता प्रार्थना ध्यानोपलक्षितभगवद्भजनमेव परमपुरुषार्थत्वेन व्यनक्ति ।
ततो भगवतस्तु तथात्वं स्वयमेव व्यक्तम् । ततश्च यथोक्तपरममनोहरमूर्तित्वमेव लक्ष्यते । तथा च "वेदानां सामवेदोऽस्मि" (गीता १०।२२) इति । तत्र च "बृहत्साम तथा साम्नाम्" (गीता १०।३५) इत्युक्तमहिम्नि बृहत्साम्नि "बृहद्धामं बृहत् पार्थिवं बृहदन्तरीक्षं बृहद् दिवं बृहद् वामं बृहद्भ्यो वामं वामेभ्यो वामम्" इति ।
तदेवं ब्रह्मजिज्ञासेति व्याख्यातम् ।

अथात इत्यस्य व्याख्यामाह “सत्यम्” इति । यतस्तत्र अथशब्द आनन्तर्ये । अतःशब्दो वृत्तस्य हेतुभावे वर्तते तस्मादथेति स्वाध्यायक्रमतः प्राक्प्राप्तकर्मकाण्डे पूर्वमीमांसया सम्यक्कर्मज्ञानादनन्तरमित्यर्थः ।
अत इति तत्क्रमतः समनन्तरं प्राप्तब्रह्मकाण्डे तूत्तरमीमांसया निर्णेयसम्यगर्थेऽधीतचराद् यत्किञ्चिदनुसंहितार्थात् कुतश्चिद् वाक्याद्धेतोरित्यर्थः ।
पूर्वमीमांसायाः पूर्वपक्षत्वेनोत्तरमीमांसानिर्णयोत्तरपक्षेऽस्मिन्नवश्यापेक्ष्यत्वातविरुद्धांशे सहायत्वात् कर्मणः शान्त्यादिलक्षणसत्त्वशुद्धिहेतुत्वाच्च तदनन्तरमित्येव लभ्यम् ।
वाक्यानि चैतानि “तद् यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते । तद् य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यकामांस्तेषां सर्वेषु लोकेषु कामचारो भवति” (छा० ८।१।६) इति ।
“न स पुनरावर्तते” (छा० ८।१५।१) इति ।
“स चानन्त्याय कल्पते” (श्वे० ५।९) इति ।
“निरञ्जनः परमं साम्यमुपैति” (मु० ३।१।३) इति ।
गीता १४।२ —

> इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
> सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ ३०२ ॥ इति ।

तदेतदुभयं विवृतं श्रीरामानुजशारीरके — मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वं तदुपरितनभागावसेयस्य ब्रह्मज्ञानस्य त्वनन्ताक्षयफलत्वं श्रूयते । अतः पूर्ववृत्तात् कर्मज्ञानादनन्तरं ब्रह्म ज्ञातव्यमित्युक्तं भवति । तदाह सर्वादिवृत्तिकारो भगवान् बौधायनः “वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषेति” । इति ।
एतदेव पुरञ्जनोपाख्याने च दक्षिणवामकर्णयोः पितृहूदेवहूशब्दनिरुक्तौ व्यक्तमस्ति । तदेवं सम्यक् कर्मकाण्डज्ञानानन्तरं ब्रह्मकाण्डगतेषु केषुचिद् वाक्येषु स्वर्गाद्यानन्दस्य वस्तुविचारेण दुःखरूपत्वव्यभिचारिसत्ताकत्वज्ञानपूर्वकं ब्रह्मणस्त्वव्यभिचारिपरतमानन्दत्वेन सत्यत्वज्ञानमेव ब्रह्मजिज्ञासायां हेतुरिति ।
अथात इत्यस्यार्थे लब्धे तन्निर्गलितार्थमेवाह “सत्यम्” इति । सर्वसत्तादावव्यभिचारिसत्ताकमित्यर्थः । परमित्यनेन अन्वयात् “सत्यं ज्ञानमनन्तं ब्रह्म” (तै० २।१) इत्यत्र श्रुतौ च ब्रह्मेत्यनेन ।
तदेवमन्यस्य तदिच्छाधीनसत्ताकत्वेन व्यभिचारिसत्ताकत्वमायाति । तदेवमत्र तदेतदवधि व्यभिचारिसत्ताकमेव ध्यातवन्तो वयमिदानीं त्वव्यभिचारिसत्ताकं ध्यायेमेति भावः ।
अथ परत्वमेव व्यनक्ति “धाम्ना” इति । अत्र धामशब्देन प्रभाव उच्यते प्रकाशो वा । “गृहदेहत्विट्प्रभावा धामनि” इत्यमरादिनानार्थवर्गात् न तु स्वरूपम् । तथा कुहकशब्देनात्र प्रतारणकृदुच्यते । तच्च जीवस्वरूपावरणविक्षेपकारित्वादिना मायावैभवमेव ततश्च स्वेन धाम्ना स्वप्रभावरूपया स्वप्रकाशरूपया वा शक्त्या सदा नित्यमेव निरस्तं कुहकं मायावैभवं यस्मात् तम् । तदुक्तम् “मायां व्युदस्य चिच्छक्त्या” (भा० १।७।२३) इति ।

तस्या अपि शक्तेरागन्तुकत्वेन स्वेन इत्यस्य वैयार्थ्यं स्यात् । स्वस्वरूपेणेत्येवं व्याख्याने तु स्वेनेत्यनेनैव चरितार्थता स्यात् । यथा कथञ्चित् तथा व्याख्यानेऽपि कुहकनिरसन-लक्षणा शक्तिरेवापद्यते । सा च साधकतमरूपया तृतीयया व्यक्तेति ।

एतेन मायातत्कार्यविलक्षणं यद् वस्तु तत्तस्य स्वरूपमिति स्वरूपलक्षणमपि गम्यम् । तच्च "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० २।१।१) इति । "विज्ञानमानन्दं ब्रह्म" (बृ० ३।९।२८) इति श्रुतिप्रसिद्धमेव ।

एतच्छ्रुतिलक्षकमेव च सत्यमिति विन्यस्तम् । तदेवं स्वरूपशक्तिश्च साक्षादेवोपक्रान्ता ततः सुतरामेवास्य भगवत्त्वं स्पष्टम् ।

अथ मुख्ये सत्यत्वे युक्तिं दर्शयति "यत्र" इति । ब्रह्मत्वात् सर्वत्र स्थिते वासुदेवे भगवति यस्मिन् स्थितस्त्रयाणां गुणानां भूतेन्द्रियदेवतात्मको यस्यैवेशितुः सर्गोऽप्ययममृषा शुक्त्यादौ रजतादिकमिवारोपितो न भवति किन्तु "यतो वा इमानि" (तै० ३।१।१) इति श्रुतिप्रसिद्धे ब्रह्मणि यत्र सर्वदा स्थितत्वात् "सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत् कुर्वत उपदेशात्" (ब्र० सू० २।४।२०) इति यदेककर्तृकत्वाच्च सत्य एव ।

तत्र दृष्टान्तेनाप्यमृषात्वं साधयति — तेज आदीनां विनिमयः परस्परांशव्यत्ययः परस्प-रस्मिन्नंशेनावस्थितिरित्यर्थः । स यथा मृषा न भवति किन्तु यथैवेश्वरनिर्माणं तथेत्यर्थः । "इमास्तिस्रो देवतास्त्रिवृदेकैका भवति" (छा० ६।३।४) "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य" (छा० ६।४।१) इति श्रुतेः ।

तदेवमर्थस्यास्य श्रुतिमूलत्वात् कल्पनामूलस्त्वन्योऽर्थः स्वत एव परास्तः । तत्र च सामा-न्यतया निर्दिष्टानां तेजआदीनां विशेषत्वे सङ्क्रमणं न शाब्दिकानां हृदयमध्यारोहति । यदि च तदेवामंस्यत तदा वार्यादीनि मरीचिकादिषु यथेत्येवावक्ष्यत ।

किं च तन्मते ब्रह्मतस्त्रिसर्गस्य मुख्यं जन्म नास्ति किन्त्वारोप एव जन्मेत्युच्यते । स पुनर्भ्रमादेव भवति । भ्रमश्च सादृश्यावलम्बी । सादृश्यं तु कालभेदेनोभयमेवाधिष्ठानं करोति रजतेऽपि शुक्तिभ्रमसम्भवात् । न चैकात्मकं भ्रमाधिष्ठानं बह्वात्मकं तु भ्रमकल्पि-तमित्यस्ति नियमो मिथो मिलितेषु विदूरवर्त्तिधूमपर्वतवृक्षेष्वखण्डमेघभ्रमसम्भवात् । तदेवं प्रकृतेऽप्यनादित एव त्रिसर्गः प्रत्यक्षं प्रतीयते । ब्रह्म च चिन्मात्रतया स्वत एव स्फु-रदस्ति । तस्मादनाद्यज्ञानाक्रान्तस्य जीवस्य यथा सद्रूपतासादृश्येन ब्रह्मणि त्रिसर्गभ्रमः स्यात् तथा त्रिसर्गेऽपि ब्रह्मभ्रमः कथं न कदाचित् स्यात् ? ततश्च ब्रह्मण एवाधिष्ठानत्वमि-त्यनिर्णये सर्वनाशप्रसङ्गः । आरोपकत्वं तु जडस्येव चिन्मात्रस्यापि न सम्भवति । ब्रह्म च चिन्मात्रमेव तन्मतमिति ।

ततश्च श्रुतिमूल एव व्याख्याने सिद्धे सोऽयमभिप्रायः — यत्र हि यन् नास्ति किन्त्वन्यत्रैव दृश्यते तत्रैव तदारोपः सिद्धः । ततश्च वस्तुतस्तदयोगात् तत्र तत्सत्तया तत्सत्ता कर्तुं न शक्यत एव । त्रिसर्गस्य तु तच्छक्तिविशिष्टाद् भगवतो मुख्यवृत्त्यैव जातत्वेन श्रुतत्वात् तद्व्यतिरेकेण व्यतिरेकात् तत्रैव सर्वात्मके सोऽस्ति ।

ततस्तस्मिन् न चारोपितश्च । आरोपस्तु तथापि धाम्नेत्यादिरीत्यैवाचिन्त्यशक्तित्वात् तेन लिप्तत्वाभावेऽपि तच्छङ्कारूप एव । तथा च "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा" (वि० पु० १।२२।५५) इत्यनुसारेण तत्सत्तया तत्सत्ता भवति ।

ततो भगवतो मुख्यं सत्यत्वं त्रिसर्गस्य च न मृषात्वमिति । तथा च श्रुतिः "सत्यस्य सत्यमिति तथा प्राणा वै सत्यं तेषामेव सत्यम्" (बृ० २।१।२०) इति प्राणशब्दोदितानां स्थूलसूक्ष्मभूतानां व्यवहारतः सत्यत्वेनाधिगतानां मूलकारणभूतं परमसत्यं भगवन्तं दर्शयतीति ।

अथ तमेव तटस्थलक्षणेन च तथा व्यञ्जयन् प्रथमं विशदार्थतया ब्रह्मसूत्राणामेव विवृतिरियं संहितेति बिबोधयिषया च तदनन्तरं सूत्रमेव प्रथममनुवदति "जन्माद्यस्य यतः" इति । जन्मादीनि सृष्टिस्थितिप्रलयम् । तद्गुणसंविज्ञानो बहुव्रीहिः ।

अस्य विश्वस्य ब्रह्मादिस्तम्बपर्यन्तानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यविविधविचित्ररचनारूपस्य यतो यस्मादचिन्त्यशक्त्या स्वयमुपादानरूपात् कर्त्रादिरूपाच्च जन्मादि तं परं धीमहीत्यन्वयः ।

अत्र विषयवाक्यं च "भृगुर्वै वारुणिर्वरुणं पितरमुपससार । अधीहि भो भगवो ब्रह्म" इत्यारभ्य "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व, तद् ब्रह्म" (तै० ३।१।१) इति । "तत् तेजोऽसृजत" (छा० ६।२।३) इत्यादि च ।

जन्मादिकमिहोपलक्षणं न तु विशेषणम् । ततस्तद्ध्याने तन् न प्रविशति किन्तु शुद्धमेव तद्ध्येयमिति ।

किं चात्र प्रागुक्तविशेषणविशिष्टविश्वजन्मादेस्तादृशहेतुत्वेन सर्वशक्तित्वं सत्यसङ्कल्पत्वं सर्वज्ञत्वं सर्वेश्वरत्वं च तस्य सूचितम् "यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः" (मु० १।१।९) । "सर्वस्य वशी" (बृ० ४।४।२२) इत्यादिश्रुतेः ।

तथा परत्वेन निरस्ताखिलहेयप्रत्यनीकस्वरूपत्वं ज्ञानाद्यनन्तकल्याणगुणत्वं सूचितम् "न तस्य कार्यं करणं च विद्यते" (श्वे० ६।८) इत्यादिश्रुतेः ।

ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति तन्मते ब्रह्मजिज्ञासायाम् "जन्माद्यस्य यतः" इत्यसङ्गतं स्यात् । "निरतिशयबृहद्बृंहणं च" इति निर्वचनात् । तच्च ब्रह्म "जगज्जन्मादिकारणम्" इति वचनाच्च ।

एवमुत्तरेष्वपि सूत्रेषु सूत्रोदाहृतश्रुतिगणे चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृतश्रुतयश्च तत्र प्रमाणम् । तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान् न निर्विशेषवस्तुनि प्रमाणम् ।

"जगज्जन्मादिभ्रमो यतस्तद् ब्रह्म" इति स्वोत्प्रेक्षापक्षे च न निर्विशेषवस्तुसिद्धिः । भ्रममूलमज्ञानमज्ञानसाक्षि ब्रह्मेत्युपगमात् ।

साक्षित्वं हि प्रकाशैकरसतयोच्यते । प्रकाशत्वं तु जडाद् व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति । तथा सति सविशेषत्वं तदभावे प्रकाशतैव न स्यात् तुच्छतैव स्यात् ।

किं च "तेजोवारिमृदाम्" इत्यनेनैव तेषां विवक्षितं सेत्स्यतीति "जन्माद्यस्य यतः" इत्यप्रयोजकं स्यात् ।

अतस्तत्तद्विशेषत्वे लब्धे स च विशेषः शक्तिरूप एव । शक्तिश्चान्तरङ्गा बहिरङ्गा तटस्था चेति त्रिधा दर्शिता । तत्र विकारात्मकेषु जगज्जन्मादिषु साक्षाद्धेतुना बहिरङ्गाया एव स्या-

दिति सा मायाख्या चोपक्रान्ता । तटस्था च वयं धीमहीत्यनेन ।
अथ यद्यपि भगवतोऽंशात् तदुपादानभूतप्रकृत्याख्यशक्तिविशिष्टात् पुरुषादेवास्य जन्मादि तथापि भगवत्येव तद्धेतुता पर्यवस्यति । समुद्रैकदेशे यस्य जन्मादि तस्य समुद्र एव जन्मादीनि । यथोक्तम् (भा० ११।२४।१९) —

प्रकृतिर्यस्योपादानमाधारः पुरुषः परः ।
सतोऽभिव्यञ्जकः कालो ब्रह्म तत् त्रितयं त्वहम् ॥ ३०३ ॥

तस्य च भगवतो "जन्माद्यस्य यतः" इत्यनेनापि मूर्तत्वमेव लक्ष्यते । यतो मूर्तस्य जगतो मूर्तिशक्तेर्निधानरूपतादृशानन्तपरशक्तीनां निधानरूपोऽसावित्याक्षिप्यते तस्य परमकारणत्वाङ्गीकारात् ।
न च तस्य मूर्तत्वे सत्यन्यतो जन्मापतेत् । अनवस्थापत्तेरेकस्यैवादित्वेनाङ्गीकारात् साङ्ख्यानामव्यक्तस्येव । "स कारणं करणाधिपाधिपो न चास्य कश्चिज् जनिता न चाधिपः" (श्वे० ६।९) इति श्रुतिनिषेधात् । अनादिसिद्धाप्राकृतस्वाभाविकमूर्तित्वेन तस्य तत्प्रसिद्धेश्च ।
तदेवं मूर्तत्वे सिद्धे स च मूर्तो विष्णुनारायणादिसाक्षाद्रूपकः श्रीभगवानेव नान्यः । तथा च दानधर्मे (१३।१४९।११) —

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ३०४ ॥

इत्यादिकं तत्प्रतिपादकसहस्रनामादौ । तत्रैव तु यथोक्तम् "अनिर्देश्यवपुः श्रीमान्" इति । एवं च स्कान्दे —

स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः ।
स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते ॥ ३०५ ॥
एकदेशक्रियावत्त्वान् न तु सर्वात्मनेरितम् ।
सृष्ट्यादिकं समस्तं तु विष्णोरेव परं भवेत् ॥ ३०६ ॥ इति ।

महोपनिषदि च "स ब्रह्मणा सृजति स रुद्रेण विलापयति" इत्यादिकम् ।
अत एव विवृतम् (भा० १०।७१।८) —

निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः ।
हिरण्यगर्भः सर्वश्च कालस्यारूपिणस्तव ॥ ३०७ ॥ इति ।

तव यो रूपरहितः कालः कालशक्तिस्तस्य निमित्तमात्रमिति व्यधिकरण एव षष्ठी ।

तथा "आद्योऽवतारः पुरुषः परस्य" (भा० २।६।४१) इत्यादि । "यदंशतोऽस्य स्थितिजन्मनाशाः" (भा० ६।३।१२) इत्यादि च । तदेवमत्रापि तथाविधमूर्तिर्भगवानेवोपक्रान्तः ।
तदेवं तटस्थलक्षणेन परं निर्धार्य तदेव लक्षणं ब्रह्मसूत्रे "शास्त्रयोनित्वात्" (ब्र० सू० १।१।३) । "तत् तु समन्वयात्" (ब्र० सू० १।१।४) इत्येतत्सूत्रद्वयेन स्थापितमस्ति ।
तत्र पूर्वसूत्रस्यार्थः — कुतो ब्रह्मणो जगज्जन्मादिहेतुत्वम् ? तत्राह — शास्त्रं योनिर्ज्ञानकारणं यस्य तत्त्वात् । "यतो वा इमानि भूतानि" (तै० ३।१।१) इत्यादिशास्त्रप्रमाणकत्वादिति ।
नात्र दर्शनान्तरवत् तर्कप्रमाणकत्वम् । "तर्काप्रतिष्ठानात्" (ब्र० सू० २।१।११) । अत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयत्वाद् ब्रह्मणश्चेति भावः । वैनाशिकास्त्वविरोधाध्याये तर्केणैव निराकरिष्यन्ते ।
अत्र तर्काप्रतिष्ठानं चैवम — ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वान् मुक्तात्मवत् ।
ननु भुवनादिकं जीवकर्तृकं कार्यत्वात् घटवत् ।
विमतिविषयः कालो न लोकशून्यः कालत्वात् वर्तमानकालवदित्यादि ।
तदेवं दर्शनानुगुण्येनेश्वरानुमानं दर्शनान्तरप्रातिकूल्यपराहतमिति शास्त्रैकप्रामाणकः परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविजातीय — सार्वज्ञ्यसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारविचित्रगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धः । अत एव स्वाभाविकानन्तनित्यमूर्तिमत्त्वमपि तस्य सिध्यतीति ।
अथोत्तरसूत्रस्यार्थः — ब्रह्मणः कथं शास्त्रप्रमाणकत्वं ? तत्राह "तत् तु" इति । तुशब्दः प्रसक्ताशङ्कानिवृत्त्यर्थः । तच्छास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव । कुतः ? समन्वयात् । अन्वयव्यतिरेकाभ्यामुपपादनं समन्वयस्तस्मात् । तत्र अन्वयः ।
"सत्यं ज्ञानमनन्तं ब्रह्म" (तै० २।१।१) इति ।
"आनन्दो ब्रह्म" (तै० ३।६।१) इति ।
"एकमेवाद्वितीयं ब्रह्म" (छा० ६।२।१) इति ।
"तत् सत्यं स आत्मा" (छा० ६।८।७) इति ।
"सदेव सौम्येदमग्र आसीत्" (छा० ६।२।१) इति ।
"ब्रह्म वा इदमेकमेवाग्र आसीत्" (बृ० १।४।१०) इति ।
"आत्मा वा इदमेक एवाग्र आसीत् पुरुषविध" (बृ० १।४।१) इति ।
"पुरुषो ह वै नारायणः" (नारा० १) इति ।
"एको ह वै नारायण आसीत्" (महोप० १।१) इति ।
"तदैक्षत बहु स्यां प्रजायेय" (छा० ६।२।३) इति ।
"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" (तै० २।१।३) इति ।
"तत् तेजोऽसृजत" (छा० ६।२।३) इति ।
"यतो वा इमानि भूतानि जायन्ते" (तै० ३।१।१) इति ।
"पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजोऽजायत यतः प्रजाः सर्वाणि भूतानि" (महा०) इति ।

"नारायणं परं ब्रह्म तत्त्वं नारायणः परम्" (महा० १३।४) इति ।
"ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्" (महा० १२।१) इति । इत्यादिषु च ।
अथ व्यतिरेकः ।
"कथमसतः सज् जायेत" (छा० ६।२।२) इति ।
"को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्" (तै० २।७।१) इति ।
"एको ह वै नारायण आसीन् न ब्रह्मा न च शङ्करः" (महोप० १।१) इत्यादिषु ।
अन्येषां च वाक्यानां समन्वयस्तत्रैव वक्ष्यते "आनन्दमयोऽभ्यासात्" (ब्र० सू० १।१।१२) इत्यादिना ।
स चैवं परमानन्दरूपत्वेनैव समन्वितो भवतीति तदुपलब्ध्यैव परमपुरुषार्थत्वसिद्धेर्न प्रयोजनशून्यत्वमपि ।
तदेवं सूत्रद्वयार्थे स्थिते तदेतद् व्याचष्टे "अन्वयादितरतश्चार्थेषु" इति । अर्थेषु नानाविधेषु वेदवाक्यार्थेषु सत्स्वन्वयादन्वयमुखेन यतो यस्मादेकस्मादस्य जन्मादि प्रतीयते तथेतरतो व्यतिरेकमुखेन च यस्मादेवास्य तत् प्रतीयत इत्यर्थः । अत एव तस्य श्रुत्यन्वयव्यतिरेकदर्शितेन परमसुखरूपत्वेन परमपुरुषार्थत्वं च ध्वनितम् । "एको ह वै नारायण आसीत्" (महा० १।१) इत्यादिशास्त्रप्रमाणत्वेन प्राक्स्थापितरूपत्वं चेति ।
अथ "ईक्षतेर्नाशब्दम्" (ब्र० सू० १।१।५) इति व्याचष्टे "अभिज्ञः" इति । अत्र सूत्रार्थः— इदमाम्नायते छान्दोग्ये "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म" (छा० ६।२।१) इति । "तदैक्षत बहु स्यां प्रजायेय" इति । "तत्तेजोऽसृजत" (छा० ६।२।३) इत्यादि ।
अत्र परोक्तं प्रधानमपि जगत्कारणत्वेनायाति । तच्च नेत्याह "ईक्षतेः" इति ।
यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दमानुमानिकं प्रधानमित्यर्थः । न तदिह प्रतिपाद्यम् ।
कुतोऽशब्दत्वं तस्य ? इत्याशङ्क्याह "ईक्षतेः" । सच्छब्दवाच्यसम्बन्धिव्यापारविशेषाभिधायिन ईक्षतेर्धातोः श्रवणात् । "तदैक्षत" इतीक्षणं चाचेतने प्रधाने न सम्भवेत् ।
अन्यत्र चेक्षापूर्विकैव सृष्टिः "स ऐक्षत लोकान् नु सृजा" (ऐत० १।१।१) इति । "स इमान् लोकानसृजत" (ऐत० १।१।२) इत्यादौ । ईक्षणं चात्र तदशेषसृज्यविचारात्मकत्वात् सर्वज्ञत्वमेव क्रोडीकरोति । तदेतदाह "अभिज्ञः" इति ।
ननु तदानीम् "एकमेवाद्वितीयम्" इत्युक्तेस्तस्येक्षणसाधनं न सम्भवति ? तत्राह "स्वराट्" इति । स्वस्वरूपेणैव तथा तथा राजत इति "न तस्य कार्यं करणं च विद्यते" (श्वे० ६।८) इत्यादौ । "स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतेः ।
एतेनेक्षणवन् मूर्तिमत्त्वमपि तस्य स्वाभाविकमित्यायातं निःश्वसितस्याप्यग्रे दर्शयिष्यमाणत्वात् । तच्च यथोक्तमेवेति च ।
अथ "शास्त्रयोनित्वात्" (ब्र० सू० १।१।३) इत्यस्यार्थान्तरं व्याचष्टे "तेन" इति । तच् चार्थान्तरं यथा — कथं तस्य जगज्जन्मादिकर्तृत्वं ? कथं वा नान्यतन्त्रोक्तस्य प्रधानस्य न चान्यस्य ? इति तत्राह — शास्त्रस्य वेदलक्षणस्य योनिः कारणं तद्रूपत्वात् । "एवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणं विद्या उपनिषदः श्लोकाः सूत्राण्युपसूत्राणि व्याख्यानानि" (बृ० २।४।१०) इति श्रुतेः ।

शास्त्रं हि सर्वप्रमाणागोचरविविधानन्तज्ञानमयं तस्य च कारणं ब्रह्मैव श्रूयत इति । तदेव मुख्यं सर्वज्ञम् । तादृशं सर्वज्ञत्वं विना च सर्वशृष्ट्यादिकमन्यस्य नोपपद्यत इति प्रोक्तलक्षणं ब्रह्मैव जगत्कारणं न प्रधानं न च जीवान्तरमिति ।

तदेव विवृत्याह "तेने ब्रह्म हृदा य आदिकवये" इति । ब्रह्म वेदमादिकवये ब्रह्मणे ब्रह्माणं प्रति हृदा अन्तःकरणद्वारैव न तु वाग्द्वारा तेने आविर्भावितवान् ।

अत्र बृहद्वाचकेन ब्रह्मपदेन सर्वज्ञानमयत्वं तस्य ज्ञापितम् । हृदेत्यनेनान्तर्यामित्वं सर्वशक्तिमयत्वं च ज्ञापितम् । आदिकवय इत्यनेन तस्यापि शिक्षानिदानत्वाच्छास्त्रयोनित्वं चेति । श्रुतिश्चात्र (श्वे० ६।१८) —

> यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
> तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ ३०८ ॥ इति ।

मुक्तजीवा अपि तत्कारणं नेत्याह "मुह्यन्ति" इति । यत्र ब्रह्मणि वेदाख्ये सूरयः शेषादयोऽपि । अनेन च शयनलीलाव्यञ्जितनिःश्वसितमयवेदो ब्रह्मादिविधानचनश्च यः पद्मनाभस्तदादिमूर्तिकः श्रीभगवानेवाभिहितः । विवृतं चैतत् "प्रचोदिता येन पुरा सरस्वती" (भा० २।४।२२) इत्यादिना ।

अथ "तत् तु समन्वयात्" (ब्र० सू० १।१।४) इत्यस्यार्थान्तरम — यथा शास्त्रयोनित्वे हेतुश्च दृश्यते इत्याह "तत् तु" इति । समन्वयोऽत्र सम्यक् सर्वतोमुखोऽन्वयो व्युत्पत्तिर्वेदार्थपरिज्ञातं यस्मात् तत् तु शास्त्रयोनिनिदानत्वं निश्चीयत इति । जीवे सम्यग् ज्ञानमेव नास्ति । प्रधानं त्वचेतनमेवेति भावः । "स वेत्ति विश्वं न हि तस्य वेत्ता" (श्वे० ३।१९) इति श्रुतेः ।

तदेतदस्य तदीयसम्यग्ज्ञानं व्यतिरेकमुखेन बोधयितुं जीवानां सर्वेषामपि तदीयसम्यग्ज्ञानाभावमाह "मुह्यन्ति" इति । सूरयः शेषादयोऽपि यद् यत्र शब्दब्रह्मणि मुह्यन्ति । तदेतद् विवृतं स्वयं भगवता (भा० ११।२१।४२) —

> किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
> इत्यस्या हृदयं लोके नान्यो मद् वेद कश्चन ॥ ३०९ ॥ इति ।

अनेन च साक्षाद्भगवानेवाभिहितः । अथ "ईक्षतेर्नाशब्दम्" (ब्र० सू० १।१।५) इत्यस्यार्थान्तरम् "अभिज्ञः" इत्यत्रैव व्यञ्जितमस्ति । अत्र सूत्रार्थः — ननु "अशब्दमस्पर्शमरूपमव्ययम्" (कठ १।३।१५) इत्यादिश्रुतेः । कथं तस्य शब्दयोनित्वं ?

तत्राह — प्रकृतं ब्रह्म शब्दहीनं न भवति । कुतः ? ईक्षतेः । "तदैक्षत बहु स्यां प्रजायेय" (छा० ६।२।३) इत्यत्र "बहु स्याम्" इति शब्दात्मकेक्षधातोः श्रवणात् ।

तदेतदाह — अभिज्ञः । "बहु स्याम्" इत्यादिशब्दात्मकविचारविदग्धः । स च शब्दादिशक्तिसमुदायस्तस्य न प्राकृतः प्रकृतिक्षोभात् पूर्वत्रापि सद्भावात् । ततः स्वरूपभूत एवेत्याह "स्वराट्" इति ।

अत्र पूर्ववत् तादृशं सधर्मकत्वं मूर्तिमत्त्वमपि सिद्धम् । यथाहुः सूत्रकाराः “अन्तस्तद्धर्मोपदेशात्” (ब्र० सू० १।१।१०) इति । अतोऽशब्दत्वादिकं प्राकृतशब्दहीनत्वादिकमेवेति ज्ञेयम् ।

अत्रोत्तरमीमांसाध्यायचतुष्टयस्याप्यर्थो दर्शितः । अत्र “अन्वयादितरतश्च” इति समन्वयाध्यायस्य “मुह्यन्ति यत् सूरयः” इत्यविरोधाध्यायस्य “धीमहि” साधनाध्यायस्य “सत्यं परम्” इति फलाध्यायस्येति ।

तथा गायत्र्यर्थोऽपि स्पष्टः । तत्र “जन्माद्यस्य यतः” इति प्रणवार्थः सृष्ट्यादिशक्तिमत्त्ववाचित्वात् । तदेवमेवाग्निपुराणे गायत्रीव्याख्याने प्रोक्तम् “तज्ज्योतिर्भगवान् विष्णुर्जगज्जन्मादिकारणम्” (अग्नि २१६।८) इति ।

“यत्र त्रिसर्गोऽमृषा” इति व्याहृतित्रयार्थः । उभयत्रापि लोकत्रयस्य तदनन्यत्वेन विवक्षितत्वात् ।

“स्वराट्” इति सवितृप्रकाशकपरमतेजोवाचि । “तेने ब्रह्म हृदा” इति बुद्धिप्रवृत्तिप्रेरणाप्रार्थना सूचिता । तदेव कृपया स्वध्यानायास्माकं बुद्धिवृत्तीः प्रेरयतादिति भावः ।

एवमेवोक्तम् “गायत्र्या च समारम्भः” इति । तच्च तेजस्तत्र “अन्तस्तद्धर्मोपदेशात्” (ब्र० सू० १।१।२०) इत्यादिना सम्प्रतिपन्नं यन्मूर्तं तदाद्यनन्तमूर्तिमदेव ध्येयमिति ।

तत्र चाग्निपुराणस्य क्रमस्थवचनानि (अग्नि २१६) —

एवं सन्ध्याविधिं कृत्वा गायत्रीं च जपेत् स्मरेत् ।
गायत्र्युक्थानि शास्त्राणि भर्गं प्राणांस्तथैव च ॥ ३१० ॥
ततः स्मृतेयं गायत्री सावित्री यत एव च ।
प्रकाशिनी सा सवितुर्वाग्रूपत्वात् सरस्वती ॥ ३११ ॥
तज् ज्योतिः परमं ब्रह्म भर्गस्तेजो यतः स्मृतः ॥ ३१२ ॥
भर्गः स्यात् भ्राजत इति बहुलं छन्दसीरितम् ॥ ३१३ ॥
वरेण्यं सर्वतेजोभ्यः श्रेष्ठं वै परमं पदम् ।
स्वर्गापवर्गकामैर्वा वरणीयं सदैव हि ॥ ३१४ ॥
वृणोतेर्वरणार्थत्वात् जाग्रत्स्वप्नादिवर्जितम् ।
नित्यं शुद्धं बुद्धमेकं नित्यं भर्गमधीश्वरम् ॥ ३१५ ॥
अहं ब्रह्म परं ज्योतिर्ध्यायेम हि विमुक्तये ।
तज् ज्योतिर्भगवान् विष्णुर्जगज्जन्मादिकारणम् ॥ ३१६ ॥
शिवं केचित् पठन्ति स्म शक्तिरूपं पठन्ति च ।
केचित् सूर्यं केचिदग्निं दैवतान्यग्निहोत्रिणः ॥ ३१७ ॥
अग्न्यादिरूपी विष्णुर्हि वेदादौ ब्रह्म गीयते ।
तत् पदं परमं विष्णोर्देवस्य सवितुः स्मृतम् ॥ ३१८ ॥
दधातेर्वा धीमहीति मनसा धारयेमहि ।
नोऽस्माकं यच्च भर्गस्तत् सर्वेषां प्राणिनां धियः ॥ ३१९ ॥
चोदयात् प्रेरयाद् बुद्धिं भोक्तॄणां सर्वकर्मसु ॥ ३२० ॥
दृष्टादृष्टविपाकेषु विष्णुः सूर्याग्निरूपभाक् ॥ ३२१ ॥

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।
ईशावास्यमिदं सर्वं महदादिजगद्धरिः ॥ ३२२ ॥
स्वर्गाद्यैः क्रीडते देवो यो हं सः पुरुषः प्रभुः ॥ ३२३ ॥
ध्यानेन पुरुषोऽयं च द्रष्टव्यः सूर्यमण्डले ॥ ३२४ ॥
सत्यं सदाशिवं ब्रह्म विष्णोर्यत् परमं पदम् ।
देवस्य सवितुर्देवो वरेण्यं हि तुरीयकम् ॥ ३२५ ॥
योऽसावादित्यपुरुषः सोऽसावहमनुत्तमम् ।
जनानां शुभकर्मादीन् प्रवर्तयति यः सदा ॥ ३२६ ॥ इत्यादि ।

मात्स्ये (५३।२०), अग्नि (२७२।६) —

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोत्सिक्तं तद् भागवतमुच्यते ॥ ३२७ ॥

इत्यादीनि च । तस्माद् भर्गब्रह्मपराविष्णुभगवच्छब्दाभिन्नवर्णतया तत्र तत्र निर्दिष्टा अपि भगवत्प्रतिपादका एव ज्ञेयाः । मध्ये मध्ये त्वहङ्ग्रहोपासनानिर्देशस्तत्साम्य इव लब्धे हि तदुपासनायोग्यता भवतीति ।
तथा दशलक्षणार्थोऽप्यत्रैव दृश्यः । तत्र सर्गविसर्गस्थाननिरोधाः "जन्माद्यस्य यतः" इत्यत्र ।
मन्वन्तरेशानुकथे च स्थानान्तर्गते ।
पोषणम् "तेने" इत्यादौ ।
ऊतिः "मुह्यन्ति" इत्यादौ ।
मुक्तिर्जीवानामपि तत्सान्निध्ये सति कुहकनिरसनव्यञ्जके "धाम्ना" इत्यादौ ।
आश्रयः "सत्यं परम्" इत्यादौ ।
स च स्वयम्भगवत्त्वेन निर्णीतत्वात् श्रीकृष्ण एवेति पूर्वोक्तप्रकार एव व्यक्त इति । तदेव यस्मिन्नुपक्रमवाक्ये सर्वेषु पदवाक्यतात्पर्येषु तस्य ध्येयस्य सविशेषत्वं मूर्तित्वं श्रीभगवदाकारत्वं च व्यक्तम् । तच्च युक्तं स्वरूपवाक्यान्तरव्यक्तत्वात् । भा० १०।८७।५० —

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ।
यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ३२८ ॥ इति ।

अतो "धर्मः प्रोज्झित" (भा० १।१।२) इत्यादावनन्तरवाक्येऽपि "किं वा परैः" इत्यादिना तत्रैव तात्पर्यं दर्शितम् ।
तथोपसंहारवाक्याधीनार्थत्वादुपक्रमवाक्यस्य नातिक्रमणीयमेव । "कस्मै येन विभासितोऽयम्" (भा० १२।१३।१९) इत्यादिदर्शितं तस्य तादृशविशेषवत्त्वादिकम् । यथैव

"आत्मगृहीतिरितरवदुत्तरात्" (ब्र० सू० ३।३।१६) इत्यत्र शङ्करशारीरकस्यापरस्यां योजनायामुपक्रमोक्तस्य सच्छब्दवाच्यस्यात्मत्वमुपसंहारस्थादात्मशब्दाल्लभ्यते । तद्वदिहापि चतुःश्लोकीवक्तुर्भगवत्त्वं दर्शितं च श्रीव्याससमाधावपि तस्यैव ध्येयत्वम् । तदेतदेव च "स्वसुखनिभृत" (भा० १२।१२।६८) इत्यादि श्रीशुकदेवहृदयानुगतमिति ॥ श्रीव्यासः ॥

१०६ । अथोपसंहारवाक्यस्याप्ययमर्थः—कस्मै गर्भोदकशायिपुरुषनाभिकमलस्थाय ब्रह्मणे तत्रैव येन महावैकुण्ठं दर्शयता द्वितीयस्कन्धवर्णिततादृशश्रीमूर्त्यादिना भगवता विभासितः प्रकाशितः । न तु तदापि रचितः । अयं श्रीभागवतरूपः पुरा पूर्वपरार्धादौ ।
तद्रूपेण ब्रह्मरूपेण तद्रूपिणा श्रीनारदरूपिणा योगीन्द्राय श्रीशुकाय तदात्मना श्रीकृष्णद्वैपायनरूपेण । तदात्मनेत्यस्योत्तरेणान्वयः ।
तत्र तदात्मना श्रीशुकरूपेणेति ज्ञेयम् । तद्रूपेणेत्यादिभिस्त्रिभिः पदैर्न केवलं चतुःश्लोक्येव तेन प्रकाशिता किं तर्हि तत्र तत्राविष्टेनाखण्डमेव पुराणमिति द्योतितम् । अत्र मद्रूपेण च युष्मभ्यमिति सङ्कोचेनानुक्तोऽपि श्रीसूतवाक्यशेषो गम्यः ।
एवं सर्वस्यापि श्रीभागवतगुरोर्महिमा दर्शितः । सङ्कर्षणसम्प्रदायप्रवृत्तिस्तु कृष्णद्वैपायननकर्तृकप्रकाशनान्तर्गतैवेति पृथङ् नोच्यते ।
तत् परं सत्यं श्रीभगवदाख्यं तत्त्वं धीमहि । "यत्तत् परमनुत्तमम्" इति सहस्रनामस्तोत्रात् परशब्देन च श्रीभगवानेवोच्यते । "आद्योऽवतारः पुरुषः परस्य" (भा० २।६।४१) इति द्वितीयात् ।
ब्रह्मादीनां बुद्धिवृत्तिप्रेरकत्वेनाभिधानाद् गायत्र्यर्थोपलक्षितेन धीमहीति । गायत्रीपदेनैव यथोपक्रममुपसंहरन् गायत्र्या अप्यर्थोऽयं ग्रन्थ इति दर्शयति । तदुक्तम् "गायत्रीभाष्यरूपोऽसौ भारतार्थविनिर्णयः" (गारुडे) इति ॥ श्रीसूतः ॥

१०७ । अथाभ्यासेन (भा० १२।१२।६५)—

> कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् ।
> इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसङ्गैः ॥ ३२९ ॥

कालनो नाशनः । इतरत्र कर्मब्रह्मादिप्रतिपादकशास्त्रान्तरे । अखिलेशो विराडन्तर्यामी नारायणोऽपि तत्पालको विष्णुर्वापि न गीयते क्वचिद् गीयते वा तत्र त्वभीक्ष्णं नैव गीयते । तुशब्दोऽवधारणे । साक्षात् श्रीभगवान् पुनरिह श्रीभागवत एवाभीक्ष्णं गीयते । नारायणादयो वा येऽत्र वर्णितास्तेऽप्यशेषा एव मूर्तयोऽवतारा यस्य सः । तथाभूत एव गीयते न त्वितरत्रेव तदविवेकेनेत्यर्थः । अत एव तत्तत्कथाप्रसङ्गैरप्यनुपदं पदं पदमपि लक्ष्यीकृत्य भगवानेव परि सर्वतोभावेन पठितो व्यक्तमेवोक्त इति ।
अनेनापूर्वतापि व्याख्यातान्यत्रानधिगतत्वात् ॥ श्रीसूतः ॥

१०८ । अथ फलेनापि (भा० २।२।३७)—

> पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
> पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३३० ॥

सतामात्मनः प्राणेश्वरस्य । यद्वा व्यधिकरणे षष्ठी सतामात्मनः स्वस्य यो भगवांस्तस्येत्यर्थः । तेषां भगवति स्वामित्वेन ममतास्पदत्वात् ।
अत्र कथामृतं प्रक्रम्यमाणं श्रीभागवताख्यमेव मुख्यम् "यस्यां वै श्रूयमाणायाम्" (भा० १।७।७) इत्यादिकं च तथैवोक्तमिति ॥ श्रीशुकः ॥

१०९ । अथार्थवादेन (भा० १२।१३।१) —

> यं ब्रह्मवरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्
> वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
> ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
> यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ३३१ ॥

स्तवैर्वेदैश्च स्तुन्वन्ति स्तुवन्ति । ध्यानेनावस्थितं निश्चलं तद्गतं यन् मनस्तेन ॥ श्रीसूतः ॥

११० । अथोपपत्त्या (भा० २।२।३५) —

> भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः ।
> दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३३२ ॥

प्रथमं द्रष्टा जीवो लक्षितः । कैः ? दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति — दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिद्वारा लक्षणैः स्वप्रकाशद्रष्टृलक्षकैः । तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद् वास्यादिवदिति व्याप्तिद्वारा अनुमापकैरिति ।
अथ भगवानपि लक्षितः । केन ? सर्वभूतेषु सर्वेषु भूतेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेणान्तर्यामिणा ।
आदौ सर्वैर्द्रष्टृभिरन्तर्यामी लक्षितः । ततस्तेन भगवानपि लक्षित इत्यर्थः । स च स च पूर्ववत् द्विधैव लक्ष्यते । तथा हि कर्तृत्वभोक्तृत्वयोरस्वातन्त्र्यदर्शनात् कर्मणोऽपि जडत्वात् सर्वेषामपि जीवानां तत्र तत्र प्रवृत्तिरन्तःप्रयोजकविशेषं विना न घटत इत्यनुपपत्तिद्वारान्तर्यामी लक्ष्यते । "एष ह्यनेनात्मना चक्षुषा दर्शयति । श्रोत्रेण श्रावयति । मनसा मनयति । बुद्ध्या बोधयति । तस्मादेतावाहुः सृतिरसृतिः" इति भाल्लवेयश्रुतिश्च ।
अथ तस्मै चान्तर्यामित्वैश्वर्याय तेषु यदि सर्वांशेनैव प्रविशति कोऽपि परस्तदा स्वतः पूर्णत्वाभावादनीश्वरत्वमेव स्यादित्यनुपपत्तिद्वारान्तर्यामिरूपेण तस्यांशेन भगवानपि लक्षितः । अत एव गीतोपनिषत्सु (गीता १०।४२) —

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ३३३ ॥ इति ।

विष्णुपुराणे च “स्वशक्तिलेशावृतभूतसर्गः” (वि० पु० ६।५।८४) इति ।
तथा जीवाः प्रयोजककर्तृप्रेरितव्यापाराः । अस्वातन्त्र्यात् तक्षादिकर्मकरजनवदित्येवमन्तर्यामिणि तत्त्वे व्याप्तिद्वारा सिद्धे पुनस्तेनैव भगवानपि साध्यते ।
तुच्छवैभवजीवान्तर्यामिस्वरूपमीश्वरतत्त्वं निजांशितत्त्वाश्रयं तथैव पर्याप्तेः । राजप्रभुत्वाश्रिततक्षकादिकर्मकरप्रयोजकप्रभुत्वादिवदिति । अथवात्र (भा० ३।३२।३३) —

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः ।
एको नानेयते तद्वद् भगवान् शास्त्रवर्त्मभिः ॥ ३३४ ॥

इत्येवोदाहरणीयम् । अनेनैव गतिसामान्यं च सिध्यतीति ॥ श्रीशुकः ॥ प्रत्यवस्थापितम् “वदन्ति” (भा० १।२।११) इत्यादिपद्यम् ॥
इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत् कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे षट्सन्दर्भात्मके श्रीश्रीभागवतसन्दर्भे श्रीश्रीपरमात्मसन्दर्भो नाम तृतीयः सन्दर्भः ॥

श्रीभागवतसन्दर्भे सर्वसन्दर्भगर्भगे ।
परमात्माभिधेयोऽसौ सन्दर्भोऽभूत् तृतीयकः ॥

समाप्तोऽयं श्रीश्रीपरमात्मसन्दर्भः ॥